4931

श्रीराजशेखरविरचितं

# प्रचण्डपाण्डवाख्यनाटकम्

# PRACAṆḌAPÂṆḌAVA

## EIN DRAMA DES RÂJAÇEKHARA

ZUM ERSTEN MALE HERAUSGEGEBEN

VON

CARL CAPPELLER.

STRASSBURG

VERLAG VON CARL J. TRÜBNER.

LONDON: TRÜBNER & CO.

1885.

Digitized by Google

~~IV. 2180~~

IHd h 2002.2

MAY 11 1886

Hales Fund.

Digitized by Google

# OTTO BOEHTLINGK

ZUM 11. JUNI 1885.

Digitized by Google

Digitized by Google

Weber, Ind. Stud., XVIII. 481-3.

Die nachstehende Ausgabe des *Pracaṇḍapâṇḍava* beruht auf den beiden von Aufrecht Catal. Nr. 282 und 283 beschriebenen Handschriften, Wils. 311b (B) und 230d (A), den einzigen, die meines Wissens von diesem Drama in Europa vorhanden sind. Obgleich jede derselben für sich betrachtet, namentlich in Bezug auf das Prâkrit, sehr viel zu wünschen übrig lässt, schienen sie mir doch zu einem Versuch der Herstellung des Textes auszureichen, da sie jedenfalls nicht aus einer und derselben Quelle stammen und sich meistentheils glücklich ergänzen. Beide Handschriften hatte ich schon vor mehreren Jahren verglichen; zur endlichen Herausgabe des gewonnenen Textes bewog mich besonders der Umstand, dass die Frage nach dem Zeitalter und den Werken des *Râjaçekhara* neuerdings mehrfach erörtert ist — so namentlich von R. Pischel in den Gött. Gel. Anz. 1883, 5. 1120 ff. — und zwar in einer Weise, welche es mir nahe legen musste, mit dem einzigen noch ausstehenden Drama des Dichters nicht länger zurückzuhalten.

Was nun jene Frage betrifft, so dürfte es heute wohl als ziemlich feststehend gelten, dass unser Dichter etwa um das Jahr 1000 gelebt haben muss. Dies ergiebt sich sowohl aus literärgeschichtlichen Daten, wozu ich besonders die Erwähnung des *Kavirâja* und die Citate im *Sarasvatîkaṇṭhâbharaṇa* als unterste und oberste Grenze rechne, als auch aus den politisch geschichtlichen Combinationen, die Pischel in dem erwähnten Aufsatz mit grosser Gelehrsamkeit und grossem Scharfsinn zusammengestellt hat[1]). Wenn dagegen auch die indischen Herausgeber des *Râja-*

1) Bühler's Einwendungen (Ind. Ant. 1884, p. 29) scheinen mir mit denselben nicht in Widerspruch zu stehen, da *Râjaçekhara* als der Lehrer des Vaters des *Mahîpâla* viel älter als der letztere gewesen sein muss, also tief ins 10. Jahrhundert zurückreichen und von *Kshemendra* (um 1050) wohl zu den alten gerechnet werden kann. Max Müller's übrigens nur ganz beiläufige Datirung (14. Jhrh.) scheint auf einer Verwechselung dieses

Digitized by Google

*çekhara* denselben insgesammt zu einem Zeitgenossen des *Çaṃkarâcârya* und zu einem König der *Keralas* machen, so wird dies unser Urtheil nicht umstimmen dürfen, da jene Gelehrten alle aus den Angaben in *Mâdhava's Saṃkshepaçaṃkaravijaya* geschöpft zu haben scheinen, deren unzuverlässiger Charakter nicht zweifelhaft sein kann.[1])

Ebenso wenig Gewicht brauchen wir auf den Umstand zu legen, dass die indischen Philologen das *Pracaṇḍapâṇḍava* ganz und gar ignoriren. In der That reden sie alle nur von drei Stücken des *Râjaçekhara*, dem *Bâlarâmâyaṇa*, der *Viddhaçâlabhañjikâ* und der *Karpûramañjarî*. Ich meine jedoch, wir haben darum keinen Grund, von der seit Wilson in Europa herrschenden Meinung, dass auch jenes Drama dem Dichter angehöre, über den es in seinem Prologe gerade die wichtigsten Aufschlüsse giebt, abzugehen. Schon das Citat im *Kâvyaprakâça* (S. 167 = Str. 28), das einzige freilich, das ich von einer diesem Stücke ausschliesslich angehörenden Strophe bei einem Rhetoriker nachweisen kann[2]), beweist schlagend, dass wir es hier nicht mit irgend einer späten Imitation zu thun haben. Die vielen Strophen aber, welche unser Drama, namentlich im Prolog, in vollständiger oder theilweiser Uebereinstimmung mit seinen Schwesterdramen zeigt, fallen in Anbetracht der indischen Technik, nach welcher dergleichen bekanntlich nicht die Hand eines Nachahmers, sondern vielmehr desselben Dichters verräth, ebenfalls schwer zu Gunsten unserer Ansicht ins

*Râjaçekhara* mit dem Verfasser des *Prabandhakoça* zu beruhen (India, p. 328 u. 329 n. 7).

1) Vgl. die Vorreden des *Govindaçâstrî* zum *Bâlarâmâyaṇa* (Paṇḍ. III, S. 8. 9); des *Vâmanâçârya* zur *Viddhaçâlabhañjikâ* (Paṇḍ. VI, 5. 117) und zur *Karpûramañjarî* (Paṇḍ. VII, S. 20); sowie auch die des *Satyavrata Sâmaçrami*, des Herausgebers der *Viddhaç.* in der Pratnakamramodinî. Letzterer macht zum Schluss seiner Einleitung darauf aufmerksam, dass *Kshîrasvâmin* die Strophe *gonâsâya niyojitâ°* (*V.* I, 3) citirt: indess wirft diese Notiz bei dem zweifelhaften Zeitalter dieses Commentators für unsere Frage nichts ab (Vgl. Zachariae Gött. Gel. Anz. 1885, Nr. 9, S. 377).

2) Nach Aufrecht Cat. 209a könnte es scheinen, als ob unser Stück auch im *Sarasvatîkaṇṭhâbharaṇa* citirt wird. Das ist nicht der Fall, abgesehen von der diesem Stück mit dem *Bâl.* und der *Viddh.* gemeinsamen Strophe *taraṃgaya dṛço* (31), die sich dort allerdings findet (S. 214), indessen mit manchen Abweichungen von den Lesarten aller drei Dramen.

Digitized by Google

Gewicht.[1]) Es ist nämlich *Prac.* Str. 3 = *Bâl.* I, 14; 5 = *B.* I, 10; 9 = *Viddh.* I, 8; 11 = *B.* I, 18; 12 = *B.* I, 16; 14 = *B.* I, 20; 15 = *B.* I, 9; 19* (theilweise) = *B.* X, 58; 22 = *V.* II, 22; 27 = *V.* III, 16; 31* = *B.* III, 25 = *V.* III, 27; *62 = *B* III, 32; 65 = *B.* III, 39; 92* = *Karp.* II, 32; 104* = *V.* I, 17. Auch einzelne prosaische Wendungen kehren, meist unverändert, wieder, z. B. *kim api kamanîyâ kaver âtmany âçîḥ* 1, 10 = *B.* 9, 3; *kâraya cakshushî pâraṇam* 10, 6 = *B.* 172, 15; 273, 16; 299, 8; *V.* 75, 2; zu *âtṛpter âpibatam* etc. vgl. *V.* 67, 5.

Ferner zeigen sich auch hier verhältnissmässig häufig sprüchwörtliche Redensarten, die für *Râjâçekhara* besonders charakteristisch sind, wie 3, 11; 18 (vgl. *B.* 269, 13); 29, 1 (vgl. *B.* VII. 53).

Dazu kommen andere Eigenthümlichkeiten sprachlicher und stilistischer Natur, die unser Drama mit den anderen gemein hat, unter denen ich folgende hervorheben möchte: *culukaiç culukyaḥ* Str. 17, vgl. *culukapeya B.* VII, 28 und *culukotsekya V.* I, 15; °*rakshâmaṇi* (von einem Fürsten) 23, *B.* VII, 3; *chekokti* Str. 29, 1, *B.* III, 23, *V.* 40, 9; *âcâryaka* ebd., *B.* 42, 17, III, 23; *hṛdayalehya* 10, 28, vgl. *çrotra*° *B.* III, 14; *çruti-çukti*° *V.* IV, 23, *nayana*° *B.* V, 62; *haṭhagraha* 41, *V.* VI, 23; *dambholipâṇi* = Indra, Str. 54, *B.* 292, 7; *jayapatâkâ* (Pr.) 19, 12, *B.* 170, 2; °*prakâṇḍa* trefflich 75, *B.* VII, 3; 41; 71, X, 54, *V.* II, 3; 9; *mushṭiyoga* 70, *B.* 204, 8; *krîḍopadhâna* 100 vgl. *premopa*° *B.* 92, 19; *uḍḍamara* 108, *B.* V, 9; 77; *cañcuracacañcarîka* 108, B. 76, 18; *ucitakâritâ* 36, 4 vgl. *B.* 54, 17; das seltene Verbum *tvañg* in *tvañgitabhrû*° 137, vgl. *B.* 250, 8; das onomatopoietische *taḍ* und *taḍaḍ* (mit *iti*) 75; 108; 143, *B.* IV; 59; 66, *V.* 11. u. oft. Zu den grammatischen Besonderheiten würde ich den Instrumentalis auf *itakena* in den scenischen Bemerkungen (hier nur *parikrâmitakena*) rechnen, der sonst nur selten, bei *Râjaçekhara* aber sehr häufig vorkommt; *yad uta* vor directer Rede 2, 18; 6, 19; *B.* sehr oft (s. Wtb. s. v.) die Endung *tas* nach einem Compositum (*camurâjastas* v. 68), ebenfalls eine Liebhaberei unseres Dichters, vgl. *B.* V, 45, VI, 46, VII, 69 u. o., V. III, 22; *bhujâ* als fem. 75, *B.* I, 47, *maṇḍalî* desgl.

---

1) Auch die anderen Dramen haben unter sich gemeinsame Strophen. so ist *B.* I, 17 = *V.* I, 7; *II, 17 = I, 14; III, 23 = II, 5; V, 8 = III, 2; V, 25 = IV, 6; V, 39 = I, 24; V, 73 = III, 15; VIII, 11 = IV, 20; X, 40 = III, 11. Ja sogar in *B.* allein ist III, 54 = VII, 68; VII, 38 = X, 44; VII, 39 = X, 46.

Digitized by Google

24, *B.* I, 55; *V.* II, 9 u. s. w. Auch das sonst nicht belegte prâkritische Wurzelsubstitut *ghoṭṭ* erscheint nur hier (*ghoṭṭantaṃ* 11, 9) und *V.* 149, 6 (*ghuṭṭâdu*).

Nach diesen Erwägungen scheint mir kein Grund vorzuliegen, die Autorschaft des *Râjaçekhara* für unser Drama, das dieselbe im Prolog mit grösster Bestimmtheit in Anspruch nimmt, auf Grund des Schweigens der indischen Philologen anzuzweifeln. Eine andere Frage ist es, ob wir hier wirklich ein fertiges Drama, oder etwa nur ein Fragment vor uns haben. Der abrupte Ausgang und der naheliegende Vergleich mit dem zehn Acte langen *Bâlarâmâyaṇa* scheinen für die letztere Ansicht zu sprechen. Da indessen beide Handschriften mit dem zweiten Acte abschliessen (B sogar ausdrücklich mit der Bemerkung: *samâptam idam pracaṇḍapâṇḍavâbhidhaṃ nâṭakam*), und auch eine dritte von Peterson in seinem Report p. 117, Nr. 118 erwähnte Handschrift — von der ich leider zu spät Kunde erhielt, um sie noch benutzen zu können — nach einer Mittheilung Pischel's nur von zwei Acten redet und durch ihre Umfangsverhältnisse (foll. 20) dieselbe Annahme begünstigt, so ist es wahrscheinlich, dass der Dichter sich diesmal beschränken und nur einige Scenen aus dem Epos dramatisiren wollte.

Der poetische Werth des *Pracaṇḍapâṇḍava* ist gering, wenn wir auch mit Wilson die kräftige Sprache anerkennen müssen, und die Eingangsscene zwischen *Vyâsa* und *Vâlmîki* von einem gewissen Interesse ist. Der fast ganz mangelnde Dialog und die Entlehnung aus anderen Stücken[1]) sind jedoch ein Zeichen von Schwäche, wenn auch beides durch die indische Praxis gerechtfertigt ist. Am Ende der Spielscene scheint dem Dichter beinahe der Athem auszugehen, wo wir erwarten, dass *Duryodhana* den *Yudhishṭhira* überbieten soll, während er nur dessen eigene Worte wiederholen kann (36, 10; 37, 2. 17). Aber zum Schlusse wird die Diction wieder sehr kräftig und schön, und überhaupt sind die Schwächen des Stückes nicht von der Art, einen Zweifel an seiner Echtheit zu rechtfertigen.

Mit Rücksicht auf S. 3, 2 ff. wäre es vielleicht angemessener gewesen, das Stück *Bâlabhârata* zu nennen, zumal als Pendant zu seinem Schwester-

1) Auch aus dem *Mahâbhârata* sind einige Strophen entlehnt, nämlich 18 = I, 2333, 24 = I, 109; 25 = I, 108.

Digitized by Google

stück, dem *Bâlarâmâyaṇa*. Da es indessen unter seinem anderen Namen bereits bei uns eingebürgert ist und u. a. auch im Pet. Wtb. citirt wird, so habe ich denselben beibehalten, wodurch zugleich einer Verwechselung mit dem Epos des *Amaracandra* vorgebeugt wird. Uebrigens möchte auch die, wie es nach dem Prolog scheint, vom Dichter erst nachträglich vorgenommene Umnennung in *Pracaṇḍapâṇḍava* darauf hindeuten, dass das Stück in dem Zorn der Panduiden gipfeln und nicht etwa deren Schicksale erschöpfend darstellen soll, wie ein anderes Stück desselben Verfassers die Schicksale der Râma darstellt.

Hrn. Professor Pischel, dessen freundliche Hülfe mir namentlich bei mehreren schwierigen Prâkritstellen sehr zu Statten gekommeu ist, sage ich auch hier meinen wärmsten Dank.

Dem grossen Gelehrten aber, welcher seit einer Reihe von Jahren alle meine Arbeiten mit liebevoller Theilnahme begleitet und durch eine Fülle von Anregungen und Belehrungen gefördert hat, widme ich dieses kleine Buch als ein Zeichen meiner innigen Verehrung, und in dankbarer Erinnerung an die vielen schönen Tage, die es mir vergönnt war in seiner Nähe zu verleben, und die nun leider vorrüber sind.

Jena, im Mai 1885.

Carl Cappeller.

Digitized by Google

# Berichtigungen.

| | | | | | |
|---|---|---|---|---|---|
| S. | 7 | Z. 12 | statt | करणीं | lies करणां |
| „ | 11 | 9 | „ | कन्दोदृ | „ कन्दोट्टृ |
| „ | 26 | 1 | „ | भूम णांलङ्किद् | „ भूमणालं° |
| „ | 31 | 6 | „ | फाल्गुनम | „ फाल्गुनेन |
| „ | 31 | 10 | „ | वीरो | „ वीरो |

Digitized by Google

नमः शिवाय संसारसरोजस्य रजस्विनः ।
विकासनैकसूर्याय संकोचसकलेन्दवे ॥ १ ॥

अपि च ।

ये सीमन्तितभस्मगौरजसो ये कुम्भकट्टेषिणो
ये लीढाः श्रवणाश्रयेण फणिना ये चन्द्रशैत्यद्रुहः ।
ते रुष्यन्निरिजाविभक्तवपुषः चित्तव्यथासाक्षिणः
स्थाणोर्दक्षिणनासिकापुटभुवः श्वासानिलाः पान्तु वः ॥ २ ॥

नान्द्यन्ते

सूत्रधारः । परिक्रम्य विचिन्त्य च । अहो । किमपि कमनीया कवेरात्मन्याशीः ।

आद्यः कन्दो वेदविद्यालतानां
जैह्मं चक्षुर्निर्निमेषं कवीनाम् ।
यो येनार्थी तस्य तत्प्रक्षरन्ती
वाङ्मूर्तिर्मे देवता संनिधत्ताम् ॥ ३ ॥
व्यासो वैखानसवृषा सत्यः सत्यवतीसुतः ।
भारतीं भारतकविर्देयाद्द्वैपायनो मम ॥ ४ ॥

विमृश्य । अहो । मसृणोद्गता सरस्वती यायावरस्य । यदाह ।

---

2) A विकाशैश्वर्यसूयाय, B विकसश्वर्यसूयाय 4) A सीमन्तितगातरजसो 6) A ते कुथन्निरि° साक्षिणाः 7) B स्थानोर्द° 11) A °न्याशीयदाह 11) A जिह्मं, B जैह्मं च° 16) A भारंती, B °कविं दे° ।



Digitized by Google

ब्रह्मभ्यः शिवमस्तु वस्तु विततं किं चिद्वयं ब्रूमहे
हे सन्तः शृणुतावधत्त विधृतो युष्मासु सेवाञ्जलिः।
यद्वा किं विनयोक्तिभिर्मम गिरां यद्यस्ति सूक्तामृतं
माद्यन्ति स्वयमेव तत्सुमनसो याञ्चा परं दैन्यभूः ॥ ५ ॥

पुरो ऽवलोक्य। कथम्। एते महोदयमहानगरलीलावतंसा विद्वांसः सामाजिकाः। तदेवं विज्ञापयामि। अञ्जलिं बद्ध्वा।

सा सूक्तिर्निधिनाथकेलिचषकं वेणीविभूषामणिः
सीतायाः स च कुम्भसंभवमुनेः प्राप्ता च सैकावली।
पर्यङ्कः स च विद्रुमद्रुममयस्तद्रामसिंहासनं
चिह्नं यस्य यशोनिधिर्विजयतां सो ऽयं रघोरन्वयः ॥ ६ ॥

अत्र हि

नमितमुरलमौलिः पाकलो मेकलानां
रणकलितकलिङ्गः केलिकृत्केरलेन्द्रैः।
अजनि जितकुलूतः कुन्तलानां कठोरो
हठविहतमठश्रीः श्रीमहीपालदेवः ॥ ७ ॥

तेन च रघुवंशमुक्तामणिनार्यावर्तमहाराजाधिराजेन श्रीनिर्भयनरेन्द्रनन्दनेनाराधिता सभासदः। सर्वानेष वो गुणाकरः समाहूय सप्रश्रयं विज्ञापयति। विदितमेतत्तु भवतां यदुत नाट्याचार्येण रङ्गविद्याधरेण प्रतिज्ञातम्।

---

2) A °धत्तवधृतो B °चशृतो 5) A महोदयनगरीली° 9) A तद्राजसिंहासनं 12) B केलितर्केरलेंदुः 14) A अजनि bis °श्रीः fehlt, B हठहृतमठश्रीः 16) A °राजाधिराजितश्री°, B °नंदनेन देवेनाधिवता: 18) B °करः सप्रश्रयं वतां वि°

Digitized by Google

राजशेखरकवेर्महात्मनो
बालभारतमिदं हि नाटकम् ।
यो ऽभिनेष्यति रसैर्निरन्तरं
मत्सुतां स परिणेष्यति क्षितौ ॥ ८ ॥

आकाशे। तत्रभवन्तः। किं ब्रूथ। इदं तद्बालभारतं प्रचण्डपा- 5
ण्डवमिति यस्य संज्ञान्तरम्। अञ्जलिं बद्ध्वा। यथादिशन्ति परि-
षद्ग्रेसराः। किं चित्सलज्जम्। भवदनुचराः पञ्च भ्रातरो वयं प-
ञ्चापि नाम समर्थास्तदभिनये। किं पुनरस्माकं पितृष्यपुत्रा
भरतपुत्राश्च ते सन्ति। ते च तदभिनेतुमिच्छन्ति न च ते शक्नुव-
न्ति। एतन्निमित्तं महदस्वैरं वैरं वर्तते। आकाशे। तत्रभवन्तः। 10
किं ब्रूथ। एकविषयाभिलाषो हि वैरकन्दं कन्दलयति। तन्नव-
द्भिः सह कुलान्तकरं वैरं तेषां यतो दुर्बुद्धयस्ते। सुबुद्धयो हि
भवन्तः। उक्तं हि तेनैव महामन्त्रिपुत्रेण।

श्रियः प्रसूते विपदो रुणद्धि
यशांसि दुग्धे मलिनं प्रमार्ष्टि । 15
संस्कारशौचेन परं पुनीते
शुद्धा हि बुद्धिः किल कामधेनुः ॥ ९ ॥

अञ्जलिं बद्ध्वा। प्रतिगृहीतमार्यवचः। बद्धो वाससि ग्रन्थिः।
तदित्थमामनन्ति।

अनूचानो हि यद्भूते सा स्वयंभूः सरस्वती । 20
तदार्षं न मृषार्थं स्यात्सा दृष्टिर्विदुषां दृढा ॥ १० ॥

5) u. 6) B °पांडवमिदं हि नामांतरं 7) B °दनुपचाराः A पंचापि सम-
र्थादभिनये... पितृव्यपुत्राः ज्ञात संति ते 9) B द्दच्छंति ते न शक्नुवंति तन्नि°
11) B om. तत्रभवन्तः und तद् vor भवद्भिः 12) A यतो दुर्बुद्धयो भवंतः। उ°
14) A श्रियप्र° 16) B पुरं st. परं, कुलकामधेनुः



Digitized by Google

अपि च।

आपन्नार्तिहरः पराक्रमधनः सौजन्यवारां निधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां मतः।
वर्ण्यो वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः॥ ११॥

तच्च चैवंविधो दैवज्ञानां प्रवादः।

बभूव वल्मीकभवः पुरा कवि-
स्ततः प्रपेदे भुवि भर्तुमेखलताम्।
ततः स्थितो यो भवभूतिरेखया
स वर्तते संप्रति राजशेखरः॥ १२॥

आकाशे। किं ब्रूथ। तत्प्रस्तूयतामिति। यदादिशन्ति गुरवः।

नेपथ्ये गीयते

हरचूडामणिरिन्दुस्त्रिजगद्दीपश्च दिनकरो देवः।
मासान्तसंगताविह लोकस्य हिताय वर्तेते॥ १३॥

सूचधारः। आकर्ण्य। कथम्॥ उपक्रान्तं भरतपुत्रैः। यद्वाल्मीकि-व्यासयोः प्रावेशिकी ध्रुवा गीयते। विचिन्त्य। ध्रुवा हि नाट्यस्य प्रथमे प्राणाः। यतः

प्रथयति पात्रविशेषान्सामाजिकजनमनांसि रञ्जयति।
अनुसंदधाति च रसान्नाट्यविधाने ध्रुवा गीतिः॥ १४॥

तद्भवतु। अहमप्यनन्तरकरणीयाय सज्जीभवामि। इति निष्क्रान्तः।

इति प्रस्तावना।

---

1) B om. अपि च 2) A अपन्ना° 6) B °विधौ 8) A भर्तृमंदता, B °मे-खलताम् 9) A ततस्थितो 14) B सामंतसंग° 15) B °क्रांतमेव कुशीलवैः यद्वा° 17) A प्रथमो गुणः 20) B अहमध्य° A सज्जो भवामि।

Digitized by Google

ततः प्रविशति वाल्मीकिर्व्यासश्च ।

व्यासः । सपादोपग्रहम् । भगवन् । अङ्गुसंभव एष व्यासः पाराशर्यो ऽभिवादये ।

वाल्मीकिः । पृष्ठे पाणिं निधाय । वत्स सात्यवतेय । स्वप्रबन्धपरिसमाप्त्या वर्धस्व ।

व्यासः । परमनुगृहीतो ऽस्मि । अञ्जलिं बद्ध्वा ।

योगीन्द्रश्छन्दसां द्रष्टा रामायणमहाकविः ।
वल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः ॥ १५ ॥

वाल्मीकिः । अष्टादशपुराणसारसंग्रहकारिन् । कियान्वर्तते तवेतिहासो भारतम् ।

व्यासः । सलज्जम् । पुनर्पुनरविनयोद्घाटनेन लज्जयति मामुपाध्यायः । किं वयं रामायणमहाकवेः पुरतः ।

ये विद्यापरमेश्वरप्रतिधियो ये ब्रह्मपारायणा
येषां वेदवदाहता स्मृतिमयी वाग्लोकयात्राविधौ ।
याताः स्वर्गतरंगिणीमपि सदा पूतां पुनन्त्यच ते
व्युत्पत्त्यापरया रसोपनिषदो रामायणस्यास्य ते ॥ १६ ॥

किं च । भगवन्प्रथमकवे ।

यदुक्तिमुद्रा सुहृदर्थवीथी
कथारसो यच्चुलुकैश्चुलुक्यः ।

---

2) A अद्भुतसंभवं B ऽभिवादयंते 4—8) f. in B. 7) A द्रष्ट्वा 9) A पुराणानां सं°, B °सारसंग्रहकारणम्। कि° 10) B °नवेति° 11) B °नेन न लज्जयतु 12) A रामायणकवेः 13) A परमेश्वरास्तुतधियो, AB °पारायणे 14) A वेदवदाहता 15) A स्नाताः st. याताः, ये st. ते 16) B °पनिषदां 19) B °वेपी st. वीथी A यच्चुलुकैप्रलुंप्यः (?) B यच्चुलुकैश्चलुम्प्यः

कर्णामृतस्यन्दि च यद्वचांसि
रामायणं तत्कविरुत्पुनाति ॥ १७ ॥

वाल्मीकिः। वत्स कृष्णद्वैपायन। कस्य पुनः कवेर्वचो भारतस्य षोडशीमपि कलां कलयति। यतः

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्व चित् ॥ १८ ॥

किं च।

दन्तोलूखलिभिः शिलोञ्छभिरिदं कन्दाशनैः फेनपैः
प्राणप्राशनिभिर्मिताम्बुकवलैः काले च पक्वाशिभिः।
नीवारप्रसृतिंपचैश्च मुनिभिर्यद्वा चयीचायिभिः
सेव्यं भव्यमनोभिरर्थपतिभिस्तद्वो महाभारतम् ॥ १९ ॥

किं तु श्रुतमस्माभिर्यदुत रसविरसे कष्टकाव्ये ऽभिनविष्टो ऽसीति।

व्यासः। इदमुपाध्यायपादेभ्यो विज्ञाप्यते।

विनायको यः शिवयोरपत्य-
मर्धं पुमानर्धमिभश्च देवः।
स वर्तते भारतसंहितायां
वृत्तस्तपोभिर्मम लेखको ऽच ॥ २० ॥

तेन च्छलयितुमहमुपक्रान्तः। यदुत बाढमहं ते लिपिकरः। किं पुनर्येन रंहसा लिखेयं तेन यदि संरम्भसे तत्ते विघ्नः स्यात्।

---

1) A कथामृ° 3) A om. कृष्ण. कवेः वाचो 9) A पाथः प्राश्न°, B मिताम्बुकवलीकाशे 12) A° विरमे; B कष्टकाव्ये 20) A यदि नसंहभासि(?)तव वि° B विघ्नस्यात्

ततो मयापि प्रतिच्छलितः । ओम् । अस्तु । किं पुनर्भवता भावयता लिखितव्यमित्यतः काव्यकष्टे ऽभिनिविष्टो ऽस्मि ।

वाल्मीकिः । कियान्वर्तते ते नवेतिहासः ।

व्यासः । समाप्त एव । किं तूपाध्यायपादैः स्वयंवराय पाण्डवप्रवेशो यावदाकर्णित एव ।

वाल्मीकिः । तदेहि । प्राप्तां सायन्तनीं संध्यामुपास्महे । ततः श्रावयिष्यसि । संप्रति हि

अयमहिमरुचिर्भजन्प्रतीचीं
कुपितवलीमुखतुण्डताम्रबिम्बः ।
जलनिधिमकरैरुदीक्ष्यते द्रा-
ङ्वरुधिरारुणमांसपिण्डलोभात् ॥ २१ ॥

निर्यद्वासरजीवपिण्डकरणीं बिभ्रत्कवोष्णैः करै-
र्भोजिष्ठं रविबिम्बमम्बरतलादस्ताचलं चुम्बति ।
किं च श्लोकतमः कलापकलनाश्यामायमानं मना-
ग्धूमध्यामपुराणचिरचनारूपं जगज्जायते ॥ २२ ॥

इति परिक्रम्य निष्क्रान्तौ ।

इति विष्कम्भकः ।

---

2) A लेखितव्यम् 3) A तवेतिहासः 5) A आकलित st. आकर्णित, एव । तदेहि 6) A सायंतनां 13) A भाजिष्णुं (?), B मार्ज्जिष्ठं 14) B श्लोमतमः

Digitized by Google

ततः प्रविशति ब्राह्मणवेषो युधिष्ठिरो भीमसेनाहत्वश्च । सहदेव इतरतः । सर्वे परिक्रामितवेन ।

युधिष्ठिरः । वत्स सोदर वृकोदर परपुरंजय धनंजय मण्डितपाण्डवकुल नकुल द्विषदुःसह सहदेव । इह हि महाराजसमाजे न जाने कमवलम्बयिष्यते राधावेधवैजयन्ती ।

भीमः । विहस्य ।

आर्यो वेत्ति निजां न विक्रमकलां त्वं विश्वरक्षामणिः
किं ब्रूमोऽस्य किरीटिनो भुजबलं द्रोणेन यस्योपमा ।
माद्रीनन्दनयोर्नरेन्द्र विनयच्छत्रं हि वीरव्रतं
न भ्राता स तवास्ति यस्य पुरतो राधा परो विध्यति ॥ २३ ॥

अर्जुनः ।

दुर्नमं यदि मुरारिकार्मुकं
दुर्भिदं यदि शरण्यमुच्छ्रितम् ।
दुर्जया यदि च राजमण्डली
तत्प्रभो द्रुपदजा न दुर्लभा ॥ २४ ॥

नकुलः । निखिलनरेन्द्रवृन्दाधिष्ठितान्मञ्चसंचयानपास्य मुनिजनप्रायविप्रजनपरिगृहीतं मञ्चमारोहामः । वयमपि ब्राह्मणवेषधारिण एव । सर्वे समादृत्य यथोचितमुपविशन्ति ।

नेपथ्ये । इदो इदो कुमारधट्ठज्जुणो भट्टिदारिआ अ ।

युधिष्ठिरः । प्राप्तैव स्वयंवरयित्री ।

---

3) A पांडव नकुल 5) A om. न जाने 7) A निजं क्रमबलं 8) B न घटते st. भुजबलं 10) A न भ्रातास° 12) B उत्तप्तं st. दुर्नमं 16 u. 17) B मुनिप्राय° 18) A om. सर्वे 19) AB भट्टज्जुणो (A °ज्जुमो)

Digitized by Google

ततः प्रविशन्ति सधृष्टद्युम्ना द्रौपदी वन्दी सखी च। परिक्रामतोक्तेन।

धृष्टद्युम्नः। एकतो ऽवलोक्य। कथम्। तातदुर्यदमनुग्रहीतुं महर्षयो ऽपि स्वयंवरयाचामञ्चमध्यासते। तदेनानभ्यर्चयामि।

सप्रणयमञ्जलिं बद्ध्वा।

स्वस्त्यापस्तम्ब तुभ्यं त्वमसि ननु मुने कस्य नो माननीय-
स्त्वां वन्दे याज्ञवल्क्य द्विजसदसि कवे त्वं स्तुवे भारतस्य।
विश्वामित्रः पवित्रं जगति विजयतां काममन्त्रे नमस्ते
विश्वप्रष्ठे वसिष्ठे कृतनतिरपरान्स्तौमि हर्षान्महर्षीन्॥ २५॥

द्रौपदी प्रणमति। णमो णमो महामुणीणं तुम्हाणं।

धृष्टद्युम्नः। अन्यतो ऽवलोक्य।

लक्ष्मीसंवरणैर्भुजैर्नृपतयः स्वस्त्यस्तु वः स्वागतं
नन्वेते गृहमेधिनां धुरि वयं यद्यूयमभ्यागताः।
दृष्टः केन भवादृशां पुनरियान्पूज्यः समाजो जग-
त्युत्कण्ठा भवतां च संप्रति पुरः सेयं स्थिता द्रौपदी॥ २६॥

सखी। इदो इदो भट्टिदारिआ

युधिष्ठिरः। सस्पृहमवलोक्य। हंहो लोचनचकोरकौ। आ तृप्तेरापिबतं द्रौपदीवदनेन्दुचन्द्रिकाम्।

कण्ठे मौक्तिकदाम गण्डतलयोः कार्पूरमच्छं रजः
सान्द्रं चन्दनमङ्गके विचकिलस्रक्शेखरो मूर्धनि।
तन्वी बाढमियं चकास्ति तरुणी चीनांशुके बिभ्रती
शीतांशोरधिदेवतेव गलिता व्योम्नि द्रुतं गच्छतः॥ २७॥

---

1) A om. वन्दी 3) AB एतान् B अभ्यर्हयामि 5) B त्वमपि मनुमुने 7) A काममन्त्रे 8) A विश्वप्रष्ठे, °परान्नौमि 9) B om. णमो bis तुम्हाणं 16) A हंहो भो चकोरकौ पि° B हंहो लोचनकारातृ° 19) B °शेखरं 21) A गच्छत

भीमः । द्रौपदीसंभावनमनुसंधाय स्वगतम् ।

पक्ष्मां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां
श्रोणीबन्धस्त्यजति तनुतां सेव्यते मध्यभागः ।
धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्त्रं
तन्नाचाणां गुणविनिमयः कल्पितो यौवनेन ॥ २८ ॥

अर्जुनः । स्वगतम् । हृदय । कारय चक्षुषी पारणम् । पुरतो द्रौपदी । अस्याः खलु वयोविशेषोचितमिदमधुना संभाव्यते ।

शारीद्यूतकलाकुतूहलि मनश्छेकोक्तिशिक्षारति-
र्नित्यं दर्पणपाणिना सहचरीवर्गेण चाचार्यकम् ।
प्रौढस्त्रीरचितानुवृत्तिषु रसो बाल्ये ऽपि लज्जा मनाक्
स्तोकारोहिणि यौवने मृगदृशः को ऽप्येष रम्यः क्रमः ॥ २९ ॥

नकुलः । स्वगतम् । नेत्रे । यथाशक्ति विस्तारं भजतम् ।

स्मितपरिचिता वृत्तिर्वाचामपाङ्गतरंगितं
नयनचरितं पादन्यासो नितम्बभरालसः ।
अहह सुतनोर्लीलासूचैः कृतं पदमङ्गके
वहतु मदनः शोभामाचं धनुर्ननु संप्रति ॥ ३० ॥

सहदेवः । स्वगतम् । क्षणं चक्षुषी निमेषदोषमपाकुरुतम् । इदमये हृदयलेख्यममानुषं लावण्यम् ।

तरंगय मनाग्दृशौ स्थगय दिङ्मुखान्युत्पलैः
करौ वलय जायतां सरसिजाकरो जङ्गमः ।

---

2) B nach 3. 4) A चद्वितीयत्वमाख्यं 6) A पारणे, B पारणं, विशेषमधु° 8) A सारबूत° B छेकोक्ति 10) A स्त्रीचरितानु° 11) A क्रमः । अहह सुतनोर्भी । 16) A शोभामानं 18) A हृदयलेप्यम्

Digitized by Google

विहस्य पुनरुक्ततां सुतनु लम्बयैकावली-
मुद्भ्वय मुखं भवत्ययमकाण्डचन्द्रोदयः ॥ ३१ ॥

बन्दी। तारं स्वरमाक्षाय।

सकलभुवनरक्षाः सम्प्रतन्द्रा नरेन्द्राः
शृणुत गिरमुदारामादराच्छ्रावयामि।
इह हि सदसि राधां यः शरव्यां करोति
स्मरविजयपताका द्रौपदी तत्कलत्रम् ॥ ३२ ॥

सखी। कधं। विब्भमतण्डविद्भूलदामञ्जरीभमररिञ्छोलील-ञ्छिदेण णञ्चणकन्दोट्टवत्तेण घोट्टन्तं विञ्च देावदीवञ्चणलावण्णं सञ्चं इदोमुहं पडिवट्टदि णरेन्दचक्कं।

बन्दी। अहह कुसुमायुधस्याप्रतिहतं भगवतः शासनम्। यतः।

जातं ताण्डवितभ्रु चक्षुरधुना कण्ठो लुठत्पञ्चमः
संवृत्तो ऽस्य करोत्ययं तरलितं हारं करान्दोलनैः।
मिथ्यासौ स्मयते स्थितो भणितिभिः किं चैष वैपञ्चिको
यत्सत्यं मदिरां विनैव मदनो यूनां मदोन्मादभूः ॥ ३३ ॥

कथम्। अहंपूर्विकया सर्वे ऽपि धनुरारोपयितुं संरम्भन्ते।

धृष्टद्युम्नः। हंहो कन्दर्पचण्ड। निवार्यतामियमहमहमिका महीपालानाम्।

बन्दी। किं चिदुच्चैः।

---

2) A मुखं मनागयम् 8 u. 9) °वट्टेण व्वेोट्टतं विञ्च देावदिवञ्चणलावण्णमञ्च इदो° B विस्मयतांडविद्तुमञ्जामंजरिभसरारिंकलीलछिद्दीतञ्चणकंदोट्टषंडेन-खगेाट्टंतं पिव देापदिवदाणालावण्णसञ्चं इदोमुहं पट्टिवदि णं° 12) B न्यस्तं st. आतं 13) B च तरलं st. तरलितं 15) A मनोन्मान्यभू 16) A धनुरारोपयितुं सर्वे अपि सं° 17) B इयमहमहंपूर्विकायामही°

Digitized by Google

सर्वे कार्मुककर्मठाः क्षितिभुजः सर्वे च शृङ्गारिणः
सर्वे मानमदोद्धताः शृणुत मे वन्द्यं वचो बन्दिनः ।
दुर्धर्षं धनुरच्युतस्य पणितं तच्चाध्यवस्यत्यसौ
यस्य स्याम महर्द्धि तच्च न यदि व्रीडा यशःखण्डिनी ॥ ३४ ॥

सर्वे परिक्रामितकेन ।

वन्दी । द्रौपदीं प्रति ।

शंभोर्मूर्ध्नि गतागतानि कुरुते या चन्द्रलेखाङ्किते
तस्याः शान्तनवो ऽयमुज्ज्वलयशाः स्वर्गापगायाः सुतः ।
वन्दित्वा तमुदग्रभार्गवशरश्रेणीव्रणालंकृतं
भीष्मं सुभ्रु ततः स्वयं वरनृपान्प्रत्येकमालोकय ॥ ३५ ॥

सखी । दुवदणन्दिणि । गङ्गातणओ सन्तणवो एसो । ता गुरुत्तणेण पणमिज्जदु ।

द्रौपदी । जो किल कुमारस्स बम्हचारी । णमो णमो कोरवपण्डवाणं पिदामहस्स ।

सर्वे परिक्रामितकेन ।

वन्दी । स्वगतम् । अये। भगवतो भीष्मादनूनगरिमा द्रोणाचार्य एषः । प्रकाशम् ।

सदा शिवप्रशिष्यो ऽयमवधिः सर्वधन्विनाम् ।
आकर्णपलितः सुभ्रु द्रोणाचार्यः प्रणम्यताम् ॥ ३६ ॥

द्रौपदी । जो कोरवपण्डवाणं धणुव्वेअविज्जागुरू ।

वन्दी । निजदोःस्तम्भसंभावनागर्वचर्चितविवेकान्नृपतीनवलोक्य ।

---

1) A सर्वे ऽपि 3) B दुर्धर्षं, पणितुं तच्चा° 4) A महर्द्धितद्वितमिदं व्री° 9) A वंदित्वा तदेभुयभा° 11) A गंगाताणसंत° B गुरुत्तणपाणमिज्जंतु 13) A बेम्ह-चचारी ता णमो B तामोणमोणुवकोणचाण पि° 16) A om. भगवतो 20) B पंडवकौरवाणधनुतनुविद्यागुरू 21) B °गर्वखर्वितो नप°

Digitized by Google

शिष्यो ऽस्मि भार्गवमुनेः कुरुपाण्डवानां
कोदण्डकर्मणि गुरुस्तदिदं ब्रवीमि ।
हे भूभुजो जयवपूंषि धनूंषि धत्तं
मुक्त्वार्जुनं तु भुवि विध्यति को ऽत्र राधाम् ॥ ३७ ॥

द्रौपदी। णमो दे दोणस्स सकलकोरवपण्डवाणं गुरुस्स मुक्कस्स। 5

सर्वे परिक्रामितकेन ।

बन्दी ।

दूरोदञ्चिमरीचिरत्नरचनाचित्रं तनुत्रं तनो-
रुत्कृष्य चिदशेश्वराय ददतो यस्य स्मितं चक्षुषा ।
पाञ्चालीवदनेन्दुसुन्दरतया तेनैव पर्येष्णुणा 10
सो ऽयं पश्यति दुर्धरं धनुरिदं राधां च राधासुतः ॥ ३८ ॥

विचिन्त्य। अहो। महाप्रभावं भार्गवं धनुर्यदमुना मम चक्षु-
र्ज्ञानमुन्मीलितं येनाच प्रभावं भावं च भूपतीनां प्रत्यक्षमिव
पश्यामि ।

सखी। सहि । दाणकित्तिसंतप्पिदसुअणकण्णो एसो । 15

द्रौपदी। जो दुज्जोहणपसादलद्धचम्पावदित्तणो ।

बन्दी। अहो। महात्मनामपि कैतवानुगृहीता वृत्तयः। यदेषः

दुर्नमं त्विह न भार्गवं धनुः
संशये न च सतां प्रवृत्तयः ।
अङ्गराज इति चिन्तयन्ति मां 20
भाषते व्रज पुरः कुरूद्वहम् ॥ ३९ ॥

---

3) B धत्तः 5) A गुरुस्स मुक्कस्स, B दोण ऽस्सकलसो वस्स (sic!) 8) B चित्र st. रत्न 9) AB उत्कृत्य A स्मितचक्षुषा 10) A पंचाली B पर्यस्नुणा 12) u. 13) B om. मम; येनास्य st. °नाच 15) A दाणिकित्ति° सुअणो कणो एसो B सतुं-पिदतुवाणकणो क्क° 16) B om. पसाद 17) B वंदी किमाहाङ्गराजः यदेषः 18) u. 19) B त्विह मुरारिकर्मुकं संशये ऽपि न सतां

Digitized by Google

सर्वे परिक्रामितकेन।

स एव प्रकाशम्।

यौवराज्याभिषेकार्हो वीरदुर्योधनानुजः।
दुःशासनो महावेष एष मच्चं विमुञ्चति ॥ ४० ॥

द्रौपदी। जो दूसलपहुदीणं एक्काणसदस्स जेट्ठो दुज्जोहणणरे-न्दस्स।

धृष्टद्युम्नः। स्वगतम्। यथार्थनामा दुःशासनः। स एवायम्

चापं प्रति त्रिचतुराणि पदानि दत्त्वा
कृष्णाहठग्रहनिमित्तविषण्णचेताः।
दुःशासनो नृपतिचक्रविमुक्ततारं
हुंकारलज्जितमनाः शनकैः प्रयाति ॥ ४१ ॥

द्रौपदी। अदिमेत्तचण्डचरिदो एसो।

वन्दी। निरूप्य। नमो नमो विष्णुकोदण्डपाणिबन्धाय। स्वगतम्।

द्रौपदीं परिणयन्तमर्जुनं
विद्वराधमवलोक्य मायया।
दोर्बलं विफलमात्मनो विद-
न्व्रीडयैष विनतो निवर्तते ॥ ४२ ॥

परिक्रामितकेन।

गान्धाराधिपतेः पुत्रः सुबलस्य महीयसः।
मातुलः कुरुराजस्य राजते नृपतिर्गुणैः ॥ ४३ ॥

द्रौपदी। जो जूदकेदवविअक्खणो सुणीअदि।

---

2) B वंदी 3) A वारो दुर्यो° 5) B °सदस्स जट्ठो कणिट्ठो दु° 7) A दुःशासनयोवायं 10) AB °तार st. °तारं 11) B शनकैर्निर्याति 12) B अभिणामचं° 13) B कोदण्डमनुसंधाय स्व° 17) A व्रीडयैव विरतो 21) A जो तूअकेदवविअणो सु°

Digitized by Google

सखी। आम। एदस्स किल हिअअचिन्तिदा पासआ णिवडन्ति। भीमसेणस्स उण हक्किदा।

बन्दी।

याचावतो ऽस्य चतुरङ्गचमूसमुत्थे
पांसूत्करे वियति सर्पति वीतरन्ध्रे।
दिङ्नागनागपतिकेशवकच्छपानां
मूर्ध्नि क्षणाद्भवति भूवलयस्य भारः॥ ४४॥

स्वगतम्।

धारितं द्रुपदजास्वयंवरे
कार्मुकं शकुनिना करेण यत्।
तस्य सर्वजनहासहेतवे
कंधरां समधिरुह्य तन्स्थितम्॥ ४५॥

पुनरवलोक्य विहस्य च। कथम्। विमुक्तराधावेधाभिमानस्य स्वयंवरविदुत्तीर्णं स्कन्धाङ्गनुः।

सर्वे परिक्रामितकेन।

बन्दी।

सिन्धुयन्त्रितयाचो यं सिन्धुराजो जयद्रथः।
सिन्धुपानोत्तमहयः सिन्धुप्रतिमो बली॥ ४६॥

अस्यासकृद्दलितदाडिमबीजलौल्या-
न्मुक्ताफलेषु करिणां रुधिरारुणेषु।

---

1) A किलहिलहिअअविन्तिप्रादाआणिवडंति; B एतदस्स किलहिअअचितिदादायानिभडंति 4) B समुत्थ 7) A मूर्ध्वनृणान्नवलयस्यतारः B मूध्वं, कुवलयस्य 12) B तन्स्थिरम् 13) A राधाभिमानस्य 18) A सिंधुजातोत्त° B बले st. बली Nach 18 A अपि च

Digitized by Google

व्योम्नः शुक्रान्निपतत्तरसा निरीक्ष्य
नाकस्त्रियो बहु हसन्ति सहस्रताल्यम् ॥ ४७ ॥

द्रौपदी। जो दुज्जोहणबहिणीवदी।

बन्दी। कथम्। धनुरारोपणं प्रत्ययमुदास्ते।

दुःशलागुणगणेन रञ्जितो
लज्जितश्च कुरुराजसंनिधौ
कौतुकागमनमात्मनो विद-
न्त्रासनाच्चलति नो जयद्रथः ॥ ४८ ॥

सर्वे परिक्रीमितकेन।

बन्दी।

दुर्योधनो नृपकिरीटविटङ्करत्न-
रश्मिच्छटाछुरितपादयुगाङ्गुलीकः।
हेलाचलच्चमरनर्तितकर्णपूरः
शूरः शरासनविदां प्रथमोऽयमास्ते ॥ ४९ ॥

अपि च।

पादौ वाससि सान्द्रकुङ्कुमरसन्यासप्रसक्ताकृति-
र्जातो दिग्विजयेन यैः प्रणयितां नीतः प्रणामाञ्जलेः।
ते प्रत्यग्रकपालपाचरुचिभिस्तारास्थिहारार्थिभिः
कङ्कालं नवमोप्सुभिः प्रमुदितैः कापालिकैर्वीक्षिताः॥ ५० ॥

द्रौपदी। जो खण्डपरसुचूडामणिणो कुलालंकरणं।

सखी। आम सहि। सोज्जेव्व एसो।

---

4) B दृष्टद्युम्नः st. बन्दी 5) B लंघितश्च st. लज्जितश्च 12) A पादनखांगु-लीकः 13) B कर्णसूरः 15) A अस्य च। 17) B यातुदि° 19) B ईप्सुभिश्चमु° 20) B पिण्ड st. खण्ड 21) A सहि स एसो B सखि स एव एस।

Digitized by Google

द्रौपदी। अत्थि एवं। किं पुणो समुद्दीविदज्जदुभवणत्तणेण विसासणदाणत्तणेण अ छलप्पहारी एसो।

बन्दी। किमाह महाराजदुर्योधनः।

निर्विशन्तु निजबाहुविक्रमं
शार्ङ्गनाम्नि धनुषीह पार्थिवाः।
साभिमानहृदयस्तु मादृशः
कः पणेन परिणेतुमिच्छति ॥ ५१ ॥

विचिन्त्य स्वगतम्। कथम्। अभिमानाङ्गीकरणेन परिहार एषः।

परिक्रामितवेग। एष स भगवतो वासुदेवस्यापि वन्दनीयो बलभद्रः। प्रकाशम्।

किं किं किं चुचुचुम्बनैर्मुमुमुधा वक्त्राम्बुजस्यायतो
देदेदेहि पिपिप्रिये सुसुसुरां पाचे ऽच रेरेवति।
मा मा मा विविलम्बनं कुरु कुरु प्रेम्णा हली याचते
यस्येत्थं मदचूर्णितस्य तरसा वाचः स्खलन्त्याकुलाः ॥ ५२ ॥

अपि च।

नीलांशुकं नलिनदाम च यस्य भूषा
यत्कीर्तिकारि मधुरं मधु रेवती च।
लीलासु धृष्टधनुरत्र हली सहेलं
शौरेः य एष खलु खेलति खेलगामी ॥ ५३ ॥

द्रौपदी। जो किल एरावणवारणो विअ सदासदो सदासच्छन्दो अ।

1) u. 2) B अस्ति इदं किं पुनः समुद्दीपितजतुभवनत्वेन विषा(!)सनदानत्वेन च छलप्पहारो एषः 4) A निर्जितं तु 6) A पार्थिवः st. मादृशः 9) A om स, °देवस्य वंद° 10) B om. प्रकाशम् 11) B मुदा 12) B रेवती 14) A °तस्यवदनातवाचसव° 17) B यत्प्रीति° 18) B सलोलं st. सहेलं 19) B खेल वासी 20) B om. अ



Digitized by Google

बन्ही। किमाह कामपालः।

रेवतीं त्रिभुवनैकसुन्दरीं
न प्रकोपयति रोहिणीसुतः।
तेन नैष विदधाति कौतुकी
दग्विभागमपि कृष्णकार्मुके ॥ ५४ ॥

पुनर्बन्ही।

यः पीयूषभुजां पुरः प्रहरतां दम्भोलिपाणिं रणे
निर्जित्योर्जितशार्ङ्गनिर्गतशरश्रेणीभिरुद्दामभिः।
सत्यावाञ्छितमौलिबन्धरचनैः पुष्पैः सदा सुन्दरां-
श्चक्रे नन्दनपारिजातकतरून्विश्वंभरासक्षिणः ॥ ५५ ॥

वृषतुरगकरीन्द्रस्यन्दनाद्याकृतीनां
किमपरमसुराणां मन्थिता सो ऽयमास्ते।
कृतसुरपतितोषः षोडशस्त्रीसहस्र-
प्रणिहितपरिरम्भस्यास्पदं पद्मनाभः ॥ ५६ ॥

द्रौपदी। जस्स किल कलअण्ठी मञ्जुजम्पिणी रुप्पिणी पढमकलत्तं जस्स कञ्चणमाला सच्चभामा पमदावणं हिअअस्स।

बन्ही। किमाह देवो वासुदेवः।

यस्मिन्मदस्य मदनस्य च भूर्मार्यो
यस्मिन्नमी च यदुवंशभुवः कुमाराः।

---

4) A निद्धाति 8) A निर्जितशार्ङ्ग° 9) A शृव्यावा° B °सुंदरा चक्रे 16) A कंचणाला, °वणं हि हि अअस्स B किलअंठिमंजलिसजंपिणीरुंपिणीपडसकलत्तअस्सकंचनसत्यभामासंवर्धनंमासंजाहामासवणअंहिअअस्स 18) A भूर्म्मार्यो B भूर्ममार्यो 19) A यस्मिन्नद्रोच

Digitized by Google

नन्वच सो ऽहममुना कमलावतारः
स्त्रीचक्रकेलिचतुरश्चरितेन लज्जे ॥ ५७ ॥

परिक्रामितकेन वन्दी।

वल्गच्चाणूरचूर्णीकरणसहभुवः पूतनाफुल्लकृतीनां
कर्तारः कंसवंशप्रशमपरशवः केशिनः क्लेशकाराः
यस्यासन्मानदर्पप्रबलकुवलयापीडपीडाप्रगल्भाः
क्रीडाडिम्बस्थलीलोद्धृतधरणिधराः केलयः कालियारेः॥५८॥

तस्यैष शम्बरमहासुरसुन्दरीणां
सिन्दूरमण्डनहरेण पराक्रमेण।
शश्वत्प्रकामकमनीयजनोपमानं
प्रत्यक्षपञ्चविशिखस्तनयः पुरस्तात् ॥ ५९ ॥

द्रौपदी। जो किल जाअवकुमाराणं मज्झे णिरुवमरूवरेहाज-
अपडाअं अविलम्बं अवलम्बेदि।

वन्दी। आर्यधृष्टद्युम्नः

उद्यतः क्रतुकृशानुजन्मनः
कर्तुमेष धनुषो ऽधिरोपणम्।
शार्ङ्गिणा भगवता ससंभ्रमं
भ्रूविटङ्कघटनेन वार्यते ॥ ६० ॥

परिक्रामितकेन।

धनुर्विद्यारहस्येषु शिष्यो ऽयं सव्यसाचिनः।
प्रद्युम्नस्य सहाध्यायी सात्यकिः सत्यसंगरः ॥ ६१ ॥

---

1) B ऽहममनाकमलावतारस्त्री A °तारस्त्री 4) AB पूत्कृतानं 9) B मंडल st. मण्डन 12) u. 13) A अविलंविविलास्वेदि B अअवडाआ अविडंबमवलंबदि 16) A ऽधिरोहणम् 17) u. 18) B ससंभ्रमभूर्वि° 20) B ससहस्रेषु st. रहस्येषु



Digitized by Google

अपि च।

यः सत्यस्य निधिः श्रियां च सरणिः साम्नां च धाम्नां च यो
यो दाता च दयालुरेव च पदं कीर्तेश्च नीतेश्च यः।
तस्यैतस्य स एष दूषणकणः कारुण्यपुण्यात्मनः
पात्रापात्रविवेचनं न यदभूत्सर्वस्वदानेष्वपि ॥ ६२ ॥

द्रौपदी। जो जाम्रवकुमारो भविअ अणासादिदकादम्बरीरसो। स एदस्स दोसो गुणो वा कीरदु।

वन्दी।

यागकुण्डशिखिगर्भसंभवं
वन्द्यते न तु करेण बध्यते।
इत्युदीर्य चतुरोक्ति सात्यकिः
पूजया परिहरत्ययं धनुः ॥ ६३ ॥

परिक्रामितवेत्र।

शिशुपालमहीपालो मेकलानां कुलोद्वहः
अयं सगजनिर्घोषो दनघोषसुतः परः ॥ ६४ ॥
पाणिप्रस्थैर्बकुलसुमनःसौरभं यो मिमीते
दंपत्योर्यः सुरतसमये सौख्यसंख्यां करोति।
यश्च ज्योत्स्नां चुलुकपुटकैः काममाचामतीन्दोः
शक्तः स्तोतुं बत स निखिलान्यस्य कीर्त्यद्भुतानि ॥६५॥

द्रौपदी। जो णिज्जिदसअलसुरासुरो।

वन्दी।

दक्षिणं करमुपैति वामतो
वाममञ्चति च दक्षिणादिति।

---

2) B सः st. यः 7) B करोदु st. कीरदु 10) A B बंध्यते st. बध्यते
15) A परः st. परः 19) A सपदि st. बत स 22) B पुरम् st. करम्

Digitized by Google

दूरतो ऽस्य नृपतेर्गुणार्पणे
धारणे ऽपि धनुषो विडम्बना ॥ ६६ ॥

परिक्रामितकेन ।

सत्यसंधो जरासंधः क्रान्तदिग्वलयो बलैः ।
अचैष राजते राजा मागधो मागधैः स्तुतः ॥ ६७ ॥

अस्यासमं समरकर्म दिदृक्षमाणै-
र्दोषद्वयं फणिभिरापि चमूरजस्तः ।
यत्कूणितेक्षणतया न कबन्धनृत्यं
दृष्टं श्रुता न च महाभटसिंहनादाः ॥ ६८ ॥

द्रौपदी । जो जणणीजणिददेहखण्डणो जराए रक्खसीए संधिदोत्ति जरासंधो वुच्चदि ।

बन्दी ।

अस्य वैष्णवमिदं महाधनुः स्वप्रभावविभवेन भूपतेः ।
अग्रतो भुवि दिशां च संचये दर्शयत्यतनुकार्मुकावलीः ॥६९॥

परिक्रामितकेन । कथम् । एते राजानो युगपदुपस्थिताश्चाप-मारोपयितुं विडम्बिताश्च । तथा हि

जातं कीकसभङ्गतः शकपतेर्दोर्दण्डयोः खण्डनं
निष्ठ्यूता रमठेश्वरेण वदनात्कीलालकल्लोलिनी ।
जानुभ्यां जगतीं गतश्च तरसा पाण्डुः प्रचण्डो ऽप्ययं
कोदण्डेन न खण्डिताः क्षितिभुजो दामोदरीयेण के ॥ ७० ॥

सविषादम् ।

---

1) B नृपतिर्गुणार्पने 5) A मागधसुतः 7) B दोषाद्वयं 8) A यत्कूणि-ताक्षियुगले न B नृत्तुं 9) B सदा st. श्रुता 10) A देहखंडजुणजराए B खंडणोडज° 15) B om. तथा हि । 18) B रमठेश्वरस्य

धिङ्मन्त्रं शकुनेः कुलक्षयकरं दुर्योधनं धिङ्नृपं
धिग्भीष्मं च पितामहं गुरुमपि द्रोणं सपुत्रं च धिक्।
यद्गन्धा जतुधाम्नि पण्डुतनया जीवेत्स चेदर्जुनो
राधायन्त्रमविद्धमत्र न भवेत्कन्या न च द्रौपदी ॥ ७१ ॥

धृष्टद्युम्नः।

वैकुण्ठकार्मुकहठाहरणैककण्ठे
दोर्दण्डमण्डलविखण्डितराजचक्रे।
द्राग्द्रौपदी नमितकण्ठविलोठिहार-
विश्लिष्टयष्टि गणनां गुणिनां करोति ॥ ७२ ॥

सखी। किं पुण एसो भरिदभुवणकोलाहलकलअलो।

वन्दी। अवलोक्य सहर्षम्।

धृष्टद्युम्ने विषण्णे हसति मुरजिति द्रौपदीचित्तनिम्ने
कोदण्डप्रौढिगाढग्लपितगुरुबले चात्र राज्ञां समाजे।
प्रेङ्खत्कृष्णाजिनानां करकरकजुषां वल्कलष्याकुलानां
विप्राणां कोऽपि मध्यादवतरति युवा कार्मुकेदत्तदृष्टिः ॥ ७३ ॥

अपि च।

व्रीडाननेषु वदनेषु च भूपतीनां
संचारयन्विकचपङ्कजचारुचक्षुः।
अभ्येति मत्तगजखेलगतिः स एष
साभ्यर्थनं मुनिजनेन निषिध्यमानः ॥ ७४ ॥

अर्जुनः। कति चित्पदानि गत्वा चतुर्दिशमवलोक्य।

---

1 u. 2) B immer हा st. धिक् 6) A °हठाक्रमणैककुंत B °कुंठे st. कण्ठे 7) A विषंडिनि st. विखण्डित 9) A विश्लिष्टरत्नगणनागुणसंकरोति 10) B कोलाहलेभलो 14) A °पुषां st. जुषां 21) B साभ्यार्थेतं

Digitized by Google

एतत्कृष्णस्य शार्ङ्गं ननु धनुरतनुप्राणदोर्दण्डचण्डै-
र्दूराङ्नूपप्रकाण्डैः सपदि परिहृतं शिञ्जिनीसंयतेषु ।
मध्ये राज्ञां प्रतिज्ञा मम पुनरियती मञ्जुजायन्त्वयोगे
प्रत्येकं पर्वमुद्रा त्रुटति तडिति वा जायते कर्मठं वा ॥ ७५ ॥

सरभसं परिक्रम्य धनुरारोपणं नाटयन् ।

मद्बाहुयन्त्रयुगयन्त्रितमाततज्यं
न स्याद्धनुः कथमिदं हि रथाङ्गपाणेः ।
तुन्नाटनिर्यदि न याति च भूमिपृष्ठ-
मा शेषमा च कमठाधिपमभ्युपेयात् ॥ ७६ ॥

भीमः । वत्स नकुल । भिदुरा भूमिरिति मा कदा चन कदर्थितकोदण्डतलकोटिः स्यात्किरीटी । तत्तस्याधस्ताद्वस्तं दार्ढ्याय निदधे । इति तथा करोति ।

नकुलः ।

धत्से जर्जरतां न मेदिनि मुधा मा शेष शङ्का कृथा-
स्तुभ्यं कूर्मपते नमस्त्यज भियं दिक्कुञ्जराः स्वस्ति वः ।
यज्जिष्णुर्भुजयोर्बलेन नयति ज्याहेलयैवाटनीं
धत्ते पाणितलं तले ऽस्य धनुषो वामं हिडिम्बापतिः ॥ ७७ ॥

अर्जुन आरोपयति ।

सखी । भअवदि । मिधुणसंघट्टणेक्कदेवदे कुण्ठिदे णीसेसणरेन्द-
चक्के एक्कमेक्कविप्पवीरसमुज्जमसेसं वट्टदि सअंवरविडम्बणं ।

---

2) A संजतेषु B संजनेषु 4) A पर्वमुद्रादतिभुजतिवाजायते B तडिति यज्जायते 6) A पीडितम् st. यन्त्रितम् 8) A तुंनाटतिर्यदि B बन्नाटनिटदि 10) B माकं चनकदर्थितः कोदंडबलकोटिकिरीटीतत्ताधस्ताद् 19 u. 20) A मिऊअणसंघणेक्कुडिदत्तणीसे °एसेविप्प° सअंवरदुंवरं B मिऊणासं °कुंठिदाणीसे°

Digitized by Google

अर्जुनः । बाणमोक्षं नाटयति ।

आकर्णाञ्चितचापमण्डलमुचा बाणेन यन्त्रोदर-
च्छिद्रोत्सङ्गविनिर्गतेन तरसा विद्धा च राधामुना ।

द्रौपदीमवलोक्य ।

तुल्यं शोषणमोहनप्रभृतयः प्रक्षेपकुण्ठक्रमाः
कामेन द्रुपदात्मजाहृदि हठान्न्यस्ताः स्वयं चेषवः ॥ ७८ ॥

सखी । अच्छरीअं अच्छरीअं। असलिलकुवलअकुसुमं विअ कुसुमकोदण्डतिग्गकव्वेवणमोहणोदअं इन्दआलं । से दिट्ठी विप्पवीरवदणे णिवडन्ती ण विरमदि ।

अर्जुनः । कथम्। राधावेधानन्तरमियमस्मासु स्निह्यति। यतः

जैत्रं तन्त्रं कुसुमधनुषः प्रेमसर्वस्वदूताः
सत्यंकाराः प्रणयवितते स्तुष्टये मुष्टियोगाः ।
विन्यस्यन्तः श्रवसि सुतनोर्मेचकाम्भोजभूषा-
मुत्कण्ठन्ते मयि निपतितुं नर्तिताक्षाः कटाक्षाः ॥ ७९ ॥

सखी । हा हा धिक्कष्टम् ।

ध्रुवमिदमुपदिष्टं कैश्चिदाचार्यपादै-
र्यदुत जनकशोकस्यैकहेतुः कुमारी ।
अकलितकुलशीलो ऽप्येष यत्को ऽपि धन्वी
द्रुपददुहितुरस्या वाञ्छति स्वामिभावम् ॥ ८० ॥

---

6) B न्यस्ता वये चं° 7)—9) B असलिला कुवलया ऽप्पतोअ कुसमंकुसुमको-दअंडदंडअसंततंतेसणमोहणं इंद°णिविडंतीनवि मति A °तिग्गअवपणमोहणो-दआसुदिट्ठाविविप्प° णिपंडदि (om. ण वि°) 11) A चेचं st. त्रैचं, °भूताः st. दूताः 12) B पुष्टिवेगाः st. मुष्टियोगाः 14) A उत्प्रेक्ष्यंते st. उत्कण्ठन्ते

Digitized by Google

अर्जुनः। हंहो बन्दिवृन्दारक। किमत्र कुलान्वेषणेन किं वा शीलपर्यालोचनया। धनुरारोपणमात्रपरिणेया द्रौपदी।

नेपथ्ये।

हंहो महाब्राह्मण। त्वामेवं नृपतयः समुदिता भाषन्ते।

सायकश्च त्वया मुक्तो यन्त्रं वातेन चाहतम्।
तन्मा वृथा विकत्थस्व न राधां विद्धवानसि ॥ ८१ ॥

पुनः साक्षेपम्।

रे रे ब्राह्मण मुञ्च विप्लवमिमं श्रुत्यर्थवीथीं स्मर
क्षत्रस्याथ ननु स्वयंवरविधावेकाधिकारः स्थितः।
तच्चेन्नाद्रियसे स्मरार्द्रहृदयो दण्डच्यस्त्वमुर्वीभुजां
तत्संकर्षणकार्मुके समुदिता नैते क्षमन्ते नृपाः ॥ ८२ ॥

अर्जुनः। तान्प्रति।

कस्य द्रोणो धनुषि न गुरुः स्वस्ति देवव्रताय
त्यक्ताभ्यासः कुलपतिरसौ श्रीसमुत्थैर्विलासैः।
रे कर्णाद्याः शृणुत तदिमां ब्राह्मणस्यास्य वाणीं
राधायन्त्रं रचयत पुनर्विद्धमप्यस्त्वविद्धम् ॥ ८३ ॥

सखी। सहि। इदो तरलिदहारश्रणेक्कसंमुक्कमुत्तं उच्चण्डचित्तचण्डिमाकण्णच्चिदकोदण्डमण्डलं आलिहिदभिण्डिवालं आहिद-

2) A सीललोचनया B धनुरोपणपणपरि° 4) A समुदिता नृपतयो 14) AB त्वत्काभ्यासः B कुलपतिरयं 15) A मदिमां B भो st. रे 16) A राधां यंत्रं रचयति 17—26,2) A इदो भरक्किदहारहारवकूमम्मुक्कमुत्तंडमुद्दिचित्तचंडिमाश्रणाश्चट्टिदकोदंडमंडलं श्रलिहिदभिंडिवालं आहिदमंथट्टयदिमंसंकुलंकुशभूषणआलिहिदकिकणच्चंच समंतदो समुत्थरदि विंदणरेदणं B सद्दोतर विरवदाहरणेक्कसमुक्कचक्कमुत्तंडद विलुअंठमाकण्णअंकितकोदंडमंडलंच[Lücke]डिदभिंडिपालं अहिदसंघट्टपट्टिसमग्गंकुअसंकुपट्टिसिणं आलंकिदकणअचं च समंतदो समुदिरेदि विदंणरेदाणं

संघट्टपट्टिसं संकुलकेसभूस णंलङ्किदकङ्कणञ्चं च समन्तदो समुत्थारेदि विन्दं णरेन्दाणं।

वन्दी।

संघट्टोत्पिष्टचूडाच्युतमणिकणिकाकर्बुरैर्बाहुदण्डै-
स्तूणोत्कीर्णास्त्रदण्डाः क्षितिपतय इमे सर्वतः संरभन्ते।
अप्रेक्षित्वा विलोलां द्रुपददुहितरं विद्धराधाशरव्यं
बाणं कोदण्डदण्डे विदधदयमितो वर्तनं विप्रवीरः ॥ ८४ ॥

नेपथ्ये।

देवस्य द्युमणेः कुले नृपतयो ये ये च चूडामणेः
श्रीकण्ठस्य निवेदयामि तदिदं तेषां द्वयेषामपि।
विप्रश्चीवरवान्सहायरहितः को ऽप्येष वः पश्यतां
राधावेधकरो हठेन हरते कीर्त्या समं द्रौपदीम् ॥ ८५ ॥

भीमः। वत्स धनंजय। त्वं कराकलितद्रौपदीक एव मामनुवर्तस्व। अहं राजचक्रस्य पुरतो भवामि। तथा भवति।

नकुलः। आर्य। इमं तालतरुमायुधीकुरु। भीमस्तथा करोति।

वन्दी।

उत्पाटितमहातालकृत्तचण्डगदाधरः।
विप्रवीरो द्वितीयो ऽपि पार्थिवाणां पुरः स्थितः॥ ८६॥

अर्जुनः। राजलोकमवलोक्य।

अयमहमिह विप्रः प्रोतराधारहस्य-
स्त्रिभुवनजयमुद्रा द्रौपदी चेयमच।

---

4) A चूडामणिवरक° 6) A पश्यन् चक्षुस्त्रिभागैर्द्रुपद° 7) A राजते st. वर्तनं 9) B om. ein ये 11) A संपश्यता st. वः प° 12) A कीर्त्ति यथा द्रौ° 13) B मामनुभवंतस्त्वाहं रा° 14) A कुर्वन्ति st. भवति 15) A आयुधं कुरु 17) A उत्पादित°

Digitized by Google

कलयथ यदि दोष्णश्चापदण्डप्रचण्डा-
स्त्यजत रथगजस्थास्तत्पुरस्योपकण्ठम् ॥ ८७ ॥

बन्दी । विचिन्त्य ।

वीर्यं वचसि विप्राणां क्षत्रियाणां भुजद्वये ।
इदमत्यन्तमाश्चर्यं भुजवीर्या हि यद्विजाः ॥ ८८ ॥

अर्जुनस्ततदेव पठति ।

नेपथ्ये ।

साधु ब्राह्मण साधु । क्षात्रं मार्गमनुवर्तसे ।

भीमः । यद्येवम्

प्रसर्पतु रणाङ्गणे रुधिरकेलिकल्लोलिनी
भवन्तु फलिता इव द्विरदमुण्डपिण्डैर्दिशः ।
नृमांसकवलान्तरेष्वपि च सामिलेषैर्मुखैः
कृतान्तजयमङ्गलं विदधतु ध्वनिं फेरवाः ॥ ८९ ॥

इति निष्क्रान्ताः सर्वे ।

इति प्रथमोऽङ्कः ।

---

1) A कथयतयदिष्णश्चापदंडप्रचंडास्त्व° B कलयति यदिदोस्तश्चापदंडप्रचंडात्व° 9) B अथेवं

Digitized by Google

ततः प्रविशति विदुरः सशारोपकरणश्च पुरुषः।

विदुरः।

आ देवाहिव्यपङ्केरुहसदनजुषो ऽस्मिन्महाराजवंशे
विष्वक्सेनावतारान्विजयिनि जगतामत्र चित्रप्रसूतेः।
हे विश्वे लोकपालास्त्वमपि वसुमति ब्रूहि वाचं पवित्रा-
मिन्दोरन्यस्य दृष्टा यदि किल कलया स्यात्तताङ्कः शशाङ्कः॥९०॥

तत्रैव गोत्रे संप्रति तु

वाच्यं यत्र दुरुक्तयः कुचरितं नानाविधा वर्णिका
लाभः सान्द्रतमो रसः किमपरं भावश्च मोहो महान्।
शैलूषैः कितवैरनेककपटश्रेणीमहानाटकं
द्यूतं यत्किल तत्र कौरवपतिः प्रस्तावनायां स्थितः॥९१॥

पुरुषः। अज्जधम्मावदार विदुर। किं पुण एवं भणीअदि जदो जूदमहत्तरा एवं मन्तअन्ति।

रणन्तमणिणेउरा रणरणन्तहारच्छडा
कणन्तमणिकङ्कणा मुहरमेहलामालिआ।
भवन्ति भवणङ्गणे घणघणाउले ते परं
पसण्णदिणसामिणो इह जिणन्ति जूएण जे ९२॥

---

1) A सोपकरणश्च 6) A कलयाप्यास्तां° B कलयाप्यास्त्वतांकः कलंकः 9) A मोहे st. मोहो 11) A किल तं तु वो °प्रस्तावयन् संस्थितः 12) B om. विदुर 16) B किंकिणी st. कङ्कणा 16) A घणक्कणातेपर B घणघणन्तूणीपरं 17) A पसूणसामिणो इह

Digitized by Google

विदुरः। भद्र। तिमिंगिलंगिलन्यायो ऽयं शृङ्गयति नापि जीवति। विचिन्त्य।

श्रीनिर्वासनडिण्डिमो क्षणरवः सद्म स्थिरं छद्मनां
सत्योत्सारणघोषणा तत इतो लज्जानिवापाञ्जलिः।
द्वारं ह्यार्यशःपराभवपदं गोष्ठी गरिष्ठापदां
द्यूतं दुर्नयवारिधिर्निपततां कस्तच हस्तग्रहः॥ ९३॥

पुरुषः। अज्ज धम्मावदार विदुर। किं पुण एवं सखेदं मन्तीअदि।

विदुरः। भद्र चण्डातक। शृणु यन्मन्त्र्यते। पुनस्तदेव पठति।

पुरुषः। अवि णं भेादु। सुसच्छचित्तो मित्तेसु सिणिद्धो बन्धूसु णिव्वाजरत्तो कलत्तेसु विणअभङ्गुरो गुरूसु पसादणिच्चो भिक्वेसु जुहिट्ठिरो। ता किं ति एसो कोरवेन्दस्स विसेसपरिप्फुडो।

विदुरः। किमुच्यते।

युधिष्ठिरो धर्ममयो महाद्रुमः
स्कन्धो ऽर्जुनो भीमसेनो ऽस्य शाखा।
माद्रीसुतौ पुष्पफले समृद्धे
मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च॥ ९४॥

कौरवपतिस्तु तस्य प्रत्युदाहरणम्।

---

1) A तिमिंगिलरणायोगं शृं॰ गाच जीवार B नापिजिवते 3) B °दिंडि-मोद्यनुरवः In A fehlt Z. 4,5 u. 6 bis निपततां 5) B द्वारंद्वार्यशसाप॰ 7) B किं पुन इदं मन्त्रोअदि 10)—12) A सुसछोमित्तो मित्तेसु, णिसाजरत्तो, भिजेसु, om. विसेस; परिपंचो B अभिछोभाद्र सुसछचित्तोमित्तोसुमणिद्धो, णिसद्मरत्ते क॰, भिक्षुसु 15) A भीमः स्कन्धो ऽर्जुनस्तस्य B स्कंदो, शाखाः 16) B समृद्धौ 18) B तस्योदाहरणं

Digitized by Google

दुर्योधनो मन्युमयो महाद्रुमः
स्कन्धः कर्णः शकुनिस्तस्य शाखा।
दुःशासनः पुष्पफले समृद्धे
मूलं राजा धृतराष्ट्रो मनीषी ॥ ९५ ॥

यदयमाहूय वारणावतात्प्रेमप्रणयाभ्यां नाम शकुनिकर्णकुरुपतिप्रेरितेन धृतराष्ट्रेण युधिष्ठिरो ऽभिहितः। यदुत वत्स युधिष्ठिर। दुर्योधनकारिते ऽक्ष सदसि भ्रातृद्यूतं प्रवर्तयितव्यमिति।

पुरुषः। तदो तेण किं पडिवण्णं।

विदुरः। यत्पाशसंयतो वन्यः करीव प्रतिपद्यते तथा चाभिहितं तेन।

राजसूयकृतोर्यज्वा पाण्डुपुत्रो युधिष्ठिरः।
आहूतो न निवर्तेत द्यूतादपि रणादपि ॥ ९६ ॥

पुरुषः। अज्जेव्व अहं सउणिणा पउणीकदे अक्खे ससारं सारिफलहं च समप्पिअ संपेसिदोम्हि सहामज्झे। ता अज्ज कधेसु। किं पुण कारणं दुज्जोहणस्स दुज्जणत्तणे।

विदुरः। श्रुतो मया कुड्यान्तरितेन शकुनिना सह मन्त्रयमाणो महाराजदुर्योधनः।

तच्चोत्सर्पिणि राजसूयसमये राज्ञः पृथाजन्मनो
द्वीपेशैर्विनयान्वितैरुपचितं चित्रैर्महाप्राभृतैः।

---

2) B स्कंदः, AB शाखाः 5) A आहूतो 7) B om. ऽक्ष; प्रवर्तव्यमिति 10) A यथा वाभि° st. तथा चा° 12) B पाण्डवपुत्रो 13) B द्यूतायचारणाय च 14) A सारफलहं, सहाभुग्नं st. °मज्झे 16) A दुज्जत्तणे 17) B om. महा

Digitized by Google

प्रत्यक्षीकृतवान्यदस्मि विभवं कोशाधिकारे स्थित-
स्तेनाद्यापि निरौषधो मनसि मे दाहज्वेरा जृम्भते ॥९७॥

अपि च। गन्धाराधिपते मातुल।

मायामये ऽसमसभासलिले महाब्धु
त्यक्त्वान्यतो व्रजति मय्यनभिज्ञभावम्।
यत्कृष्णया विहसितं सह फाल्गुनेन
तन्मे मनः कुसुमभावमिदं लुनाति ॥ ९८ ॥

नेपथ्ये।

देवश्चन्द्रकुलप्रकाण्डतिलकः षाड्गुण्यवाचस्पति-
र्वारि निर्मलकीर्तिनिर्झरगिरिर्भूखण्डविद्याधरः।
सप्तद्वीपजयैकलम्भितमहाश्वेतातपत्रोन्नतिः
पाण्डुः पाण्डुयशःकरो विजयते पृथ्वीपृथानन्दनः ॥९९॥

पुरुषः। किण्णरकण्ठो एसो जुहिट्ठिरबन्दी पढदि।

पुनर्नेपथ्ये।

नाले सौर्यमहोत्पलस्य विपुले सेतौ समिद्वारिधेः
शश्वत्स्वर्गभुजंगचन्दनतरौ क्रीडोपधाने श्रियः।
आलाने जयकुञ्जरस्य सुदृशां कन्दर्पदर्पे चिरं
श्रीदुर्योधनदोष्णि विक्रमधने लीनं जगन्नन्दति ॥ १०० ॥

पुरुषः। एसो दुज्जोहणमाअधो कलकण्ठो णाम।

---

3) A मातुलः 4) A मायामयेमयसभा° B सायामयेमयसमाधितलेमहाब्धु 5) A व्रजति सप्यनसिजभीवात् B °भिन्नभावं 10) B निकर st. निर्झर 11) B कृत्स्नद्वीप° 12) A चंडः पांडयशः करो B पंडोः पांडुः यशः° 13) A किन्नरकंठो B किचर° 15) A वारिणः st. वारिधेः 16) A शश्वत्स्वर्गभु° B °खंडभु° 17) B सुदृशः st. सुदृशां 19) A सो nach एसो

विदुरः। संप्राप्तावेतौ युधिष्ठिरदुर्योधनौ सभाम्। एते च भीष्मद्रोणकृपहार्दिक्यकर्णसोमदत्ताश्वत्थामाद्यः कौरवेश्वरभ्रातृशतं च प्रविशन्ति। तदावामपि प्रविशाव।

इति निष्क्रान्तौ।

इति विष्कम्भकः।

---

2) B °द्रोणदुर्योधनकृपकृतवर्माणहार्दिक्य° 3) A °माद्यो भीमसेनकौ° B °द्यः शतं च भ्रातरः कुरवः प्र°

Digitized by Google

ततः प्रविशति युधिष्ठिरो भीमसेनश्च दुर्योधनः शकुनिश्च तयोस्ताम्बूलकरङ्क-धारिण्यौ सुनन्दा सुरेखा च।

युधिष्ठिरः।

विवर्तयाक्षाञ्छकुने शारक्रीडां प्रवर्तय।
धृतराष्ट्रस्य पाण्डोश्च ममाज्ञा मौलिमृच्छति ॥१०१॥
राजसूयक्रतोर्यज्वा पाण्डवो ऽहं युधिष्ठिरः।
आहूतो न निवर्तेयं द्यूतादपि रणादपि॥१०२॥

शकुनिः। स्वगतं दक्षिणं पाणिमुद्वम्य।

हंहो हस्त कृतास्त्र दानसलिलप्रक्षालित स्वस्ति ते
लोकेषूक्षविचक्षणश्च शकुनिः स्वाङ्के ऽपि भक्तस्त्वयि।
वीरे माननिधौ पराक्रमधने यज्ञाग्निनेये मम
श्रीः पार्थप्रथमादपास्य भवता कार्या हि दुर्योधने॥१०३॥

तदार्य पणः क्रियताम्।

युधिष्ठिरः।

हारो ऽयं केरलस्त्रीविहसितशुचिभिः पङ्क्तिभिर्मौक्तिकानां
शुक्रेणैकाकृतीनां कृतसकलसभागर्भचन्द्रोदयश्रीः।
भ्रातृद्यूते पणो मे रजनिचरपतेरर्जितो राजसूये
यस्यैतन्मध्यरत्नं तिरयति ककुभः कौङ्कुमीभिः प्रभाभिः॥१०४॥

भीमः। भवतस्तु कः पणः।

---

1) A °करंकावाहिन्यो 4) B प्रवर्त्तयथाचा ऽग्र° 5) B पांडोश्च समाज्ञामौलिसं-चति 7) B ननुवर्त्तेयं द्यूताय च रणाय च 8) B स्व... यस्य fehlt. 9) A हस्त नितान्तदान° 11) B तज्ञागिनीये 12) A कार्यो 15) B पंथिभिर् 16) A °कृतीनकृत° 18) A °रत्नं मुरपतिककुभको° B करयति st. तिरयति



Digitized by Google

दुर्योधनः ।

राजावलीक्रमायातो रत्नकोशः पणो मम ।
शकुन्तलाद्याभरणैर्यः पुनाति च पाति च ॥ १०५ ॥

उभौ क्रीडतः ।

शकुनिः । जितं महाराजदुर्योधनेन । हंहो युधिष्ठिर । हारितो हारः ।

दुर्योधनः सुरेखायाः कण्ठे परिधत्ते ।

सुनन्दा । महाराअ दुज्जोहण । जुहिट्ठिरकण्ठणिवेसी ससीसे पडिच्छणिज्जो दे हारो । जं पुण अम्हारिसजणजोग्गं करेसि ता ण रोहिणीवल्लहकुलोचिदं अणुचिट्ठसि ।

भीमः । साधु सुनन्दे साधु । उचितमभिहितम् ।

सुरेखा । अइ उड्डामरसीले जूदजिदे वि अहिजणत्तणं ।

शकुनिः । स्वगतम् । प्रतिभावती सुरेखा । तं प्रति प्रकाशम् । अपरः पणः क्रियताम् ।

युधिष्ठिरः । संपादिता तातधृतराष्ट्रस्याज्ञा । तदास्ताम् ।

शकुनिः । विहस्य । दुर्योधने क्रीडति कथं धर्मात्मजो विरमति । नन्वधुनैव प्रतिज्ञातम् । आहूतो न निवर्तेयं द्यूतादपि रणादपीति ।

युधिष्ठिरः । सुनन्दामवलोक्य सस्मरणम् ।

कुर्वन्त्यो नयनैरपाङ्गतरलैर्दीर्घायुषं मन्मथं
तन्वन्त्यो हृदि रागिणां रतिमहावल्लीविलासं क्रमात् ।

---

3) A °लाद्याभरणं यः 8) A °निवेसीससममीसे पडि° B कंठ, dann nach kleiner Lücke निवेसेचससीस पडि° 12) B करेमि 12) A °जिदेपिअंतस्स B °जिदेधिजतुणा 13) A प्रभावती 18) AB निवर्त्तेत द्यूताय च रणाय च (A चेति) 21) A रागिणो स्मरमहा°

न्यस्यन्तो मदिरामदस्य च हठात्कां चिन्मनोहारिता-
मङ्गैर्मुग्धमधूकपाण्डुभिरिमा वाराङ्गना मे पणः॥१०६॥

भीमः। भवतस्तु कः पणः।

दुर्योधनः।

सुधावीचिमुचां वाग्भिर्विभ्रमवल्लिकुण्डलः। 5
ममापि वारनारीणां स्मरस्मेरो गणः पणः॥ १०७॥

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन।

दुर्योधनः। सुरेखे। त्वमेतासां सुनन्दाप्रभृतीनामधिष्ठात्री भव।

सुरेखा। जं कुरुवदी आणवेदि। प्रणमति। 10

सुनन्दा। धम्मण्णदणो उण जदि जिणन्तो आसि सुरेहाप-
मुहीणं ता अहं अहिट्ठाइआ आसि।

शकुनिः। अपरः पणः क्रियताम्।

युधिष्ठिरः।

निरर्गलविनिर्गलद्गुलुगुलाकरालैर्गलै- 15
रिमे तडिति ताडितोड्डमरदिण्डिमोड्डामराः।
मदाचमनचञ्चुरप्रचुरचञ्चरीकोच्चयाः
पणः परिणतिक्षणक्षततटान्तरा दन्तिनः॥ १०८॥

भीमः। भवतस्तु कः पणः।

दुर्योधनस्तदेव पठति। 20

उभौ क्रीडतः।

शकुनिः। जिता दन्तिनः।

5) A °वाचां st. मुचां 12) A om. आसि nach जिणन्तो, अहिट्ठिआसि B जदि उण 16) A इमे नितततताडि° 17) A चञ्चुर f. चञ्चुर B °काञ्चयः 18) A परिणतिक्षततटादंतिनः।



Digitized by Google

दुर्योधनः । नेपथ्यं प्रति । दुःशासन । द्यूतदन्तिनां त्वमसि प्रणेता ।

नेपथ्ये । यदादिशत्यार्यदुर्योधनः ।

शकुनिः । अपरः पणः क्रियताम् ।

युधिष्ठिरः ।

क्वणत्कनककिङ्किणीमुखरकंधरासंधिभि-
र्युतास्तरुणतित्तिरच्छविमनोजवैर्वाजिभिः ।
द्रुणाङ्घनपट्टिशचिशिखदण्डिनः स्तम्भिनो
रथाः प्रचलकाञ्चनध्वजमहापताकाः पणः ॥ १०९ ॥

भीमः । भवतस्तु कः पणः ।

दुर्योधनस्तदेव पठति ।

उभौ क्रीडतः ।

शकुनिः । हारिता रथाः ।

दुर्योधनः । नेपथ्यं प्रति । सखे ऽङ्गराज । त्वं रथानां नेता भव ।

नेपथ्ये । यदादिशति कौरवेश्वरः ।

शकुनिः । अपरः पणः क्रियताम् ।

युधिष्ठिरः ।

महीधरदरीषु ये सुनिनदं पतद्भिः खरै-
र्लिखन्ति च पठन्ति च स्फुटतरं टकारानिव ।
विरोचनहयावलीकुलभुवां स नेषामयं
पणः पवनरंहसां मम तुरंगमाणां गणः ॥ ११० ॥

---

3) B तदपरः 5) B कणंकणित° 6) A तित्तिरिच्छविमनोरमैर् B तित्ति-रच्छदमनो° 7) B चिशिखि° 8) B ध्वजकुथाप° 9) u. 10) fehlen in B. 14) A रथनेता 18) A ये निनदनिःप° Bमहीधरधरासु 19) A टकारानि च 20) B कुलभवां

Digitized by Google

भीमः। भवतस्तु कः पणः।

दुर्योधनस्तदेव पठति।

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन।

दुर्योधनः। मातुल। त्वमेतेषां तुरंगमाणां प्रभुर्भव।

शकुनिः। यदाह महाराजः। राजानमुद्दिश्य।

किं वाजिभिः किमु गजैः किमथो रथैश्च
सापत्नकं न धृतये धरणिः पणो ऽस्तु।
एकातपत्रमिदमद्य चिराय राज्यं
धर्मात्मजो भजतु वा धृतराष्ट्रजो वा॥ १११॥

युधिष्ठिरः। यद्येवम्

ऐलः प्राक्स पुरूरवाः प्रभुरभूद्यस्योर्वशी वल्लभो
दुःषन्तः स च यो ऽभ्यसूत भरतं शाकुन्तलं शान्तये।
श्रीमाञ्छंतनुरग्रिमः स च सतां गङ्गाकलत्रेण य-
स्तत्सिंहासनमम्बुराशिरशनां शासन्महीं मे पणः॥ ११२॥

भीमः। भवतस्तु कः पणः।

दुर्योधनस्तदेव पठति।

नेपथ्ये।

राजन्युधिष्ठिर नराधिप कौरवेन्द्र
वंशे युवां भगवतो भवशेखरस्य।
द्यूतं न युष्मदुचितं ननु चिन्यतां च
कैः क्षत्रियैर्वसुमती पणिता पुराणैः॥ ११३॥

---

1) u. 2) fehlen in B. 5) B भर्त्ता st. प्रभुर् 10) A धर्मात्मजे भवतु वा धृतराष्ट्रजे वा 11) AB यस्योर्वशी वल्लभा 15) A °राशिरसनासारं मही 20) A वंशी st. वंशे

Digitized by Google

युधिष्ठिरः । भो सभासदः । कथं किल राजसूययज्वा प्रतिज्ञातमर्थं कदर्थयति ।

दुर्योधनः । हंहो सभ्याः । अक्षधर्मा अपि निषिध्यन्ते ।

उभौ क्रीडतः ।

शकुनिः । जितं जितं महाराजदुर्योधनेन ।

दुर्योधनः । स्वयमहमस्य राज्यार्धस्याधिष्ठाता ।

शकुनिः । अपरः पणः क्रियताम् ।

युधिष्ठिरः । किं नामावशिष्टं यत्पणीक्रियते ।

शकुनिः । किं नाम हारितं शरीरे तिष्ठति । शरीरधना हि राजानः ।

युधिष्ठिरः । यद्येवम्

निर्यान्ति यस्य वदनाद्धितथा न वाचो
यो राजसूयविधिनिर्धुतपाप्मपङ्कः ।
सोढा न चानुजमहाविरहस्य यो ऽस्मि
सो ऽयं स्वयं तव पणः प्रथमः पृथाभूः ॥ ११४ ॥

भीमः । स्वगतम् । कथम् । आत्मापि पणीकृतः । अहो सत्यसंधता युधिष्ठिरस्य । प्रकाशम् । भवतस्तु कः पणः ।

दुर्योधनः ।

हेलानमन्नृपकिरीटविघट्टकोटि-
शृङ्गारिरत्नचितकाञ्चनपादपीठः ।

---

1) u. 2) B प्रतिज्ञात अर्थं 3) A सर्वाः st. सभ्याः 4) A परिक्रीडतः 6) A om. स्वयम् B अधिष्ठिता 7) B om. शकुनिः 8)—10) fehlen in B. 13) A °निर्जितपापपंकः 14) u. 15) B यो ऽस्मिन्सो 16) A om. स्वगतम् 19) u. 20) A °भौलिक्रंकारि° B क्रेङ्कारि°

Digitized by Google

वैतालिकैः स्तुतसमस्तयशास्तवश्रीः
सो ऽयं स्वयं प्रतिपणस्तव कौरवेन्द्रः ॥ ११५ ॥

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन।

युधिष्ठिरः। जितो ऽस्मि। तव नियोगे भृत्यः।

शकुनिः। पुनरपरः पणः क्रियताम्।

युधिष्ठिरः। कः पुनरपरः पणः।

शकुनिः। भ्रातरः।

युधिष्ठिरः।

यो मन्थानकरः क्रतौ निजकुलप्राकारबन्धश्च यो
दोर्भ्यां यः प्रसभं व्यधत्त च जरासंधस्य संधिच्छिदाम्
सो ऽयं हन्महिडिम्बडिम्बविजयी वीरस्त्रिलोकाद्भुतं
भीमो भीमपराक्रमः पृथुगदाव्ययायपाणिः पणः ॥ ११६ ॥

भीमः। भवतस्तु कः पणः

दुर्योधनः।

संकर्षणान्निजतनूज्ज्वलकीर्तिराशेः
सार्धं मयाधिगतदिव्यमहारहस्यः।
त्वत्सोदरस्य मम सोदर एष वीरो
दुःशासनः प्रतिपणो ऽस्य वृकोदरस्य ॥ ११७ ॥

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन।

---

1) A वैतालिकस्तुत° 5) B ऽस्मि तन्नियोगाय कृते। 10) A °कारशृंखल 12) A वीर° st. वृक° 17) A °गदारहस्तः 20) fehlt in A. 21) A जितं कौरवराजेन

दुर्योधनः। अपरः पणः क्रियताम्।

युधिष्ठिरः।

कर्णप्रावरणैः सहैकचरणानश्वाननैः किंनरा-
स्त्यक्षैस्तुल्यशिखान्वलीमुखमुखैर्यक्षांश्च रक्षांसि च।
निर्जित्याकनकाद्रितो जनपदान्यो राजसूये क्रतौ
सम्राजं कृतवान्युधिष्ठिरमलं सो ऽयं किरीटी पणः॥११८॥

भीमः। भवतस्तु कः पणः।

दुर्योधनः।

यो भार्गवाङ्गवतो ऽर्जितचापवेदो
द्रोणेन तुल्यगरिमा मम धर्ममित्रम्।
स्म प्रेरितार्थिजनवाग्भिररिक्तकर्णैः
कर्णः स्वयं प्रतिपणो ऽस्य धनंजयस्य॥११९॥

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन। तदपरः पणः क्रियताम्।

युधिष्ठिरः।

सौहार्दात्प्रणयादथ प्रथमतः स्नेहातिरेकेण वा
यो देवेन रथाङ्गिनापि समरे हित्वा कं लम्भितः।
पाश्चात्यक्षितिपालनिर्मलयशःप्रस्तारहारान्हर-
न्सो ऽयं मे नकुलः कुलैकतिलको युद्धप्रवीणः पणः॥१२०॥

भीमः। भवतस्तु कः पणः।

दुर्योधनः।

---

3) u. 4) A °नरान् अधिस्, वर्षाणि र° 10) B मित्रधर्मं st. धर्ममित्रम् 14) B om. तद् vor अपरः 17) B स्नेहातिरेकस्य वा B °तिरिक्तस्य वा 20) A युद्धप्रवीरः

Digitized by Google

नकुलस्यापि ते भ्रातुर्भ्राता प्रतिपणो मम।
बिभ्रत्कीर्तिमहानावि विकर्णः कर्णधारताम् ॥ १२१ ॥

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन। तदपरः पणः क्रियताम्।

युधिष्ठिरः।

हेलालोलितपाण्ड्यकेरलबलो यः सिंहलं लङ्घय-
न्द्राक्संक्षुभ्य विभीषणेन तरसा दुरात्करं लम्भितः
नित्यं रावणनिर्जितामरहतैर्यैः संभृतो भूषणैः
सौम्यश्रीः सहदेव एष स पणः क्षत्रैकचूडामणिः ॥ १२२ ॥

भीमः। भवतस्तु कः पणः।

दुर्योधनः। अनिर्जितो भ्राता विकर्ण एव मम पणः।

उभौ क्रीडतः।

शकुनिः। जितं जितं महाराजदुर्योधनेन। तदपरः पणः क्रियताम्।

युधिष्ठिरः। किं नाम न हारितम्। कः पुनरपरः पणः।

दुर्योधनः। धर्मदारा द्रौपदी।

युधिष्ठिरः।

संभूता द्रुपदाध्वरे हुतभुजः पाण्डोर्नृपस्य स्नुषा
राधावेधमहापणेन विजिता राज्ञां पुरः पश्यताम्।
भूभृन्मौलिमणीन्दुदीधितिजलैर्यो स्नातपादाम्बुजा
सा देवी विनयाभिमानवसतिः कृष्णा वितृष्णा पणः॥१२३॥

---

1) B प्रतिपणे 2) A महानावं 7) B °खोठितपाण्डु 8) B प्राक्सं°, संवितः 12) B भ्राता मम विकर्ण एव 16) B नामापहारितं किं पु°

Digitized by Google

भीमः । भवतस्तु कः पणः ।

दुर्योधनः ।

ज्येष्ठत्वात्पाण्डुपुत्रस्य धृतराष्ट्रस्य या स्नुषा ।
सा देवी देवराजार्हा मम भानुमती पणः ॥१२४॥

सुनन्दा । स्वगतम् । एसो जेट्ठकणिट्ठाणं विणिमओ ।

उभौ क्रीडतः ।

शकुनिः । जितं जितं महाराजदुर्योधनेन ।

दुर्योधनः । दुःशासन । आनीयतां द्यूतदासी द्रौपदी ।

नेपथ्ये । यदादिशति कौरवपाण्डवनाथः ।

दुर्योधनः । अपरः पणः क्रियताम् ।

युधिष्ठिरः । न मे पणान्तरमस्ति ।

दुर्योधनः ।

वर्षाणि द्वादशारण्ये सह तिष्ठतु निष्ठया ।
अज्ञातचर्चया वर्षमावयोर्यो विजीयते ॥१२५॥

युधिष्ठिरस्तदेवानुवदति ।

उभौ क्रीडतः ।

शकुनिः । जितं जितं महाराजदुर्योधनेन ।

नेपथ्ये

पञ्चानां या कलत्रं द्रुपदमखविधौ चाद्भुतं जन्म यस्याः
पूताया राजसूयावभृथपरिगमे मन्त्रपूतैः पयोभिः ।
तामेतां द्यूतदासीं कुरुपतिनियमं मूर्ध्नि कृत्वा मयान्तः
केशेष्वाकृष्यमाणां शृणुत नृपतयो यस्य शक्तिः स पातु ॥१२६॥

---

2—4) fehlt in A. 4) B देवी देवमम 6) A °कणिट्ठीणं विणिमयं B जदट्ठकणिट्ठणिविणिमओ 9) B पांडवकौरवनाथः 11) B प्रातिभाति nach अस्ति 13) A निष्टया:

Digitized by Google

दुर्योधनः। कथम्। अयं संपादितमदाज्ञः सद्रौपदीको वस्त्रदुःशासनः प्राप्त एव।

ततः प्रविशति यथानिर्दिष्टा द्रौपदी दुःशासनश्च।

दुःशासनस्तदेव पठति।

सुनन्दा। सहसोपसृत्य हस्तमोटनं नाटयन्ती। दुस्सासण। मुञ्च मुञ्च पञ्चालकेसहत्थं।

दुःशासनस्तामपनुद्य समन्तादवलोक्य विहस्य च।

यन्मुक्तः स्फारतारध्वनिभरितसभाकुञ्जगर्भः सरोषं
हुंकारः कातराणां तरलितहृदयः फाल्गुनस्यायजेन।
कुर्वद्भिर्हारवल्लीहननिनिबिडिताञ्जूटकूटान्नृपैस्त-
व्यस्ताः खड्गेषु रत्नत्सरुषु सभसंसं प्रहाराय हस्ताः॥१२७॥

सुनन्दा। हस्तमोटनं पुनर्नाटयित्वा।

अस्सा चुम्बिअपल्लवाण बहुणा णेहेण वड्ढुज्जुणा
जाणं मुक्कलवेणिबन्धणकरो भाआ स वित्तिंजिणो।
चरणं पराडवगेहिणीअ चिहुरे आकड्ढअन्तेण ते
किं दुस्सासण दुस्सहा कवलिआ हालाहलग्गंगरा॥१२८॥

द्रौपदी। वच्छ दुस्सासण। मुञ्च मे केसहत्थं। कधं एक्कवत्था भविअ गुरुणरेन्दपुरदो संचरिस्सं।

दुःशासनः। विहस्य। नन्वपनयाम्येकवस्त्रताम्। क्रोटवीकरणेन वस्त्राकर्षणं नाटयन्।

---

1) B कथं मया सं° 5) B हस्तामोटं 9) A स्फारभारध्वतिमरितसभ्रगकुंज° 11) A निविडितं B निविडितां ज्रू° 12) A स्वङ्गेषु st. खड्गेषु 13) B पुनः परिमोठनं ना° 14) A अंवाचुं° णेहेणब्बट्टुज्जुणो B अस्सा चु° 15) A वेणिबंधनकरोभाआसर° B जाणं मुक्किलवेणिबंधमाकरोमाआसविच्तिंदिणो 16) A चंडपं° चिडरे कठन्नाअन्तेण B दंडपंडवगेहिणीविदितरेतेकंडुअंतेण ते 17) A कवलिदोहाहाहरमंकुरा B कवलिदा हालाहलग्गजङ्गरा 18) A om. मे B पुरओ चरिस्सं 20) B °वस्त्राहरणं को° वस्त्रतडनं।

Digitized by Google

यावन्नैकं द्रुपददुहितुः कृष्यते वस्त्रमस्या-
स्तस्याश्चान्यन्नवति पिहितं तावदङ्गं ततश्च।
खिन्नं चैतन्मम करतलं वाससां चैष राशि-
स्तन्मन्ये ऽसौ त्रिभुवनमनोमोहिनीं वेत्ति विद्याम्॥१२९॥

द्रौपदी। भो दुस्सासण। मम किं अवरद्धं जेण दुज्जणोचिदं करेसि।

दुःशासनः। अयि पाञ्चालि। पञ्चानां कलत्रं भूत्वा किमपि व्रीडसे। साक्षेपम्।

हे द्रौपदि त्वमसि काचि पतिव्रतानां
किं दृष्टपञ्चपुरुषा वनिता कलत्रम्।
दुर्योधनस्य तदिमं भज वाममूरु-
मास्फालितं मुकुलिताङ्गुलिना करेण॥१३०॥

द्रौपदी। तदनादृत्याञ्जलिं बद्ध्वा। हंहो सहामञ्चट्ठिदा गुरुणो णरेन्दा अ। देवदी णिसण्णं पत्थेदि।

नेपथ्ये। द्रौपदि। विकर्णस्त्वामाह। क्रीदृशो निर्णयः।

द्रौपदी। किं अहं पढमं हारिदा जूदे अप्पा वा धम्मणन्दणेण।

नेपथ्ये। प्रजावति। तवायमभिप्रायः।

यद्यहं हारितपूर्वा भवामि द्यूतकिंकरी।
आत्मा वा हारितः पूर्वं तदहं नास्मि हारिता॥१३१॥

---

1) A यावत्तैकद्रु° वस्त्रमेकं 2) A तस्याश्चास्यामन्यैर्भ° B तस्यानेन्यन्नवतिपिधत्ताव° 5) A मम किं अपदिवदाजेण कधेसि B किमपदिर्भादुजणोचिदं करेसि 7) B पांचालानां st. पञ्चानां A किमच st. किमपि 8) A सा ापं st. साक्षेपम् 11) u. 12) B तदिमं भजवासमूनंमास्फा° 16) A om. पढमं 17) B तवायदहं° (om. 18 u. 19 bis पूर्वं)

Digitized by Google

दुःशासनः। सक्रोधम्। अरे रे अकर्ण विकर्ण। सभामध्यमध्यासीने भुवनपतावार्यदुर्योधने किमित्थं प्रलपसि।

प्रविश्य

विकर्णः। साक्षेपम्।

द्यूतं क्षत्रकुलव्रतं नहि भवेज्जेतुः पणो ऽस्वामिनां
संरम्भः किमकाण्ड एव भवता सद्वर्त्म यत्त्यज्यते।
भो दुःशासन कः क्रमो द्रुपदजाकेशाम्बराकर्षणे
दुर्वृत्तिं क्षमते न कस्य चिदयं भ्राता विकर्णस्तव॥ १३२॥

दुःशासनः। सभ्रूकुटीबन्धम्। अरे रे धार्तराष्ट्र बटो। वाचाटो ऽसि। तदद्यप्रभृति

न्यायवादी विकर्णो ऽभवद्य यद्यहं बहिः।
तद्द्यूयं शतमेकोनं षट् च संप्रति पाण्डवाः॥ १३३॥

दुर्योधनः। तदतिमुह्यतस्तव कतरः पन्थाः।

विकर्णः।

यां मे वलः सुबलवान्दलितप्रलम्भां
शिष्येषु सत्स्वपि महत्सु गदामदत्त।
सा मे यदादिशति हस्ततलावतीर्णा
दुर्वृत्तदण्डनविधौ मम सो ऽच पन्थाः॥ १३४॥

समन्तादवलोक्य।

क्षत्रैकचासचिन्ताकुलमनसि नभःसिन्धुपुत्रे पवित्रे
द्रोणे द्राक् श्मश्रु शुभ्रं दलयति शकुनौ वर्णयत्यक्षशिक्षाम्।

1) u. 2) A कर्ण st. अकर्ण, किमर्थं st. °किमित्थं 5) A न स भवेज्जेतुः पणो स्वामिना B कुलंव्र°, स्वामिना 9) A विकर्ण vor तद् 11) A विकर्णोचभ° 15) A योयंवलः B दलितंप्र° 20) A निभः st. नभः 21) A शिचयत्यच°

कर्णे कर्णान्तिकस्थे हसति कुरुपतौ दृष्टयः पाण्डवानां
हन्नं दुःशासनं च क्षितिपतितिलकं यान्ति धर्मात्मजं च॥१३५॥

दुःशासनः। हे द्रौपदीत्यादि पठति।

विकर्णः। अहो उचितकारिता पाण्डवानाम्।

आकर्ण्य कौरवकुमारबलं पचण्ड-
मत्युल्बसन्ति गुरुरोषकषायतारः।
दग्दृष्टयो नृपतिसंसदि पाण्डवानां
दृष्ट्वा युधिष्ठिरमुखं पुनरानमन्ति॥ १३६॥

पुनरवलोक्य। अहो किमपि महारम्भः सभासदां क्षोभः।

द्योतच्चूडामणीनां चलनझणझणत्कारिहारच्छटानां
प्रेङ्खोलत्कङ्कणालीकलकलमुखरैर्दोर्भिरुद्दामराणाम्।
निःश्वासैः साट्टहासं किमिदमिदमिति त्वङ्कितभ्रूलतानां
संक्षोभो भूपतीनां विततमपि सभागर्भरन्ध्रं रुणद्धि॥१३७॥

पुनरवलोक्य। अहो कौरवपतेराज्ञा। अहो तच्च सत्यता महीपालानाम्।

अस्मिन्महासदसि कौरवपाण्डवीये
क्षोभं गते द्रुपदजाचिकुराञ्चनाभिः।
दुर्योधनेन भ्रुकुटी कुटिलीकृता च
जाताश्च भूमिपतयो लिखिता इवैते॥ १३८॥

सरभसं युधिष्ठिरमुपसृत्य। आर्ययुधिष्ठिर। प्रतिष्ठस्व वनवासाय। द्यूतहारितमनुष्ठीयताम्।

5) A कौरववलं प्रसभं प्र° 6) A अभ्युल्लसंति 7) A प्राग्दृष्टयो B नृपतिसंपदि 10) B द्योतः चू°, °हारिच्छटानां 12) B °इदमतोवलितभ्रूल° 13) A विमनमपि 14) A सौम्यता st. तच्चसत्यता 17) A om. क्षोभं गते 19) A यातास्च, B जाता च 20) B प्रतिष्ठध्वं 21) A द्यूतसालिमतमनु°

Digitized by Google

सर्वे समुत्तिष्ठन्ति ।

द्रौपदी । रे रे दुज्जोहण ।

एसो से करकडुणा परिहवे आमुक्कबन्धक्कमो
ता सव्वं चित्र चच्चरीअकसणे केसोच्चओ थाहिइ ।
णक्कवग्गङ्गुसकोडिपाडिअमहादुस्सासणोरत्थली-
रत्तुल्लेहि करेहि णिच्चअमिमं भीमो ण जा बन्धइ ॥१३९॥

भीमः । रे रे दुर्योधन । दोर्दण्डद्वयभीमस्य भीमसेनस्य मम शृणु प्रतिज्ञाम् ।

येनेयं याज्ञसेनी नृपसदसि हठात्केशपाशे गृहीता
यश्चास्याः कोटवीत्वं बत कलयति भो वाससां राशिकारः ।
सो ऽहं तेनैव रोषारुणनयनपुटः पाणिनोत्पाटितेन
त्वां हन्ता हन्त वक्षस्तटभुवि रटतो दुष्टदुःशासनस्य ॥१४०॥

अपि च । रे रे दुर्योधन ।

नखक्रकचपाटनच्युटितकीकसाड्क्षसः
सिरासरणिभिर्मृधे रुधिरमुत्फलत्फेनिलम् ।
तदञ्जलिमयं रुषा हृदि निवेश्य दौःशासने
युधिष्ठिरसहोदरः शृणु वृकोदरः पास्यति ॥१४१॥

किं च । एकस्मिन्नपराधे ऽपि सर्वे सहधर्मचारिणो ऽपराद्धाः ।

ततश्च ।

---

3) A एसोसोहणकटुणवणे B एसासेकरकंडुणा 4) A तासवं चित्र, केउ-वितुथाहिउ B तासञ्चंचित्र, केसोश्चडाथाहि इ 5) A °पाडिद्महसाभाषत-त्थली B णकवग्गेकुस° 6) A तत्थलेहिल्लतेहिणिच्चयद्मंभीमेणज्ञातंतथीत B रं-तुल्लेहिकेरहि, भीमेणजावंधुइ 7) A °नस्यसमस्तमेप्रति° 9) A केशहस्तगृ° B केशपाशी 10) A वत विद्धति हि B कोटवित्तं चतविद्धतितोवासरा-राशिकारः 11) B °रुणद्लनपुटः 15) A शिरासरणिनिस्सरद्रुधिरधारमुत्फे 16) A तद्ंजलिरयं, निपात्य दौः B मद्ंजलि° 18) A om. किं च, अपरा-धिनि सर्वे सहचारिणो

Digitized by Google

द्रोणादुपार्जितधनुर्निगमप्रबन्धा-
न्सर्वानपि स्थितवतो वयसि प्रकामम् ।
भ्रातॄन्हनिष्यति शतं तव भीमसेनः
काले गदाप्रहरणे रणकर्मशौण्डः ॥ १४२ ॥

5 ततश्च ।

दोर्दण्डमण्डलितचण्डगदाप्रहारै-
रामूलतस्त्रडडिति चुटितोरुसंधेः ।
दुर्योधनस्य विकटां मुकुटायपीडां
द्राग्लोठयिष्यति रणे चरणेन भीमः ॥ १४३ ॥

10 शकुनिः । निर्गच्छत वनवासाय । को हि द्यूतजितानामुद्विजते मौखर्येण ।

इति परिक्रम्य निष्क्रान्ताः सर्वे ।

इति द्वितीयोऽङ्कः ।

---

1) A प्रहारैः st. प्रबन्धान् 2) A प्रकामे B °ग्रे 3) B भ्रातुंशतं तव ह° 4) B °प्रहरणो 6) B °मंडितसुचंड° 7) A तटद्दिति, B तठद्दिति 8) A °यपीठा B °यपेचीं° 10) B उद्वेजति A °जते भवतामैश्वर्येण

---

Druck von Gebr. Unger in Berlin, Schönebergerstr. 17a.

Digitized by Google

# Alphabetisches Versverzeichniss.


anûcâno hi yad brûte 10
ayam aham iha viprah 87
ayam ahimarucir 21
asmin mahâsadasi 138
asya vaishṇavam idam 69
asyâsakṛd dalitadâḍima° 47
asyâsamaṃ samara° 68
assâ cumbiapallavâ° 128
âkarṇâñcitacâpamaṇḍala° 78
âkarṇya kauravakumâra° 136
â devâd divyapañkeruha° 90
âdyah kando veda° 3
âpannârtiharah 11
âryo vetti nijâṃ na 23
utpâṭitamahâtâla° 86
udyatah kratukṛçânu° 60
etat kṛshṇasya çârṅgam 75
eso se karakaḍḍhaṇâ 139
ailah prâk sa purûravâh 112
kaṇṭhe mauktikadâma 27
karṇaprâvaraṇaih sahaika° 118
kasya droṇo dhanushi 83
kim vâjibhih kim u gajaih 111
kiṃ kiṃ kiṃ cucucumbanair 52
kurvantyo nayanair 106
kvaṇatkanakakiṅkiṇî° 109
kshatraikatrâsacintâ° 135
gândhârâdhipateh putrah 43
câpaṃ prati tricaturâṇi 41
jâtaṃ kîkasabhaṅgatah 70
jâtaṃ tâṇḍavitabhru 33
jaitraṃ tantraṃ kusuma° 79
jyeshṭhatvât pâṇḍuputrasya 124
tatrotsarpiṇi râjasûya° 97
taraṃgaya manâg dṛçau 31
tasyaisha çaṃbaramahâ° 59
dakshiṇaṃ karam upaiti 66
dantolûkhalibhih 19
durnamaṃ yadi murâri° 24
durnamam tv iha na 39
duryodhane nṛpakirîṭa° 49
duryodhano manyumayo 95
duhçalâguṇagaṇena 48
dûrodañcimarîciratna° 38
devaç candrakula° 99
devasya dyumaṇeh 85
dordaṇḍamaṇḍalita° 143
dyûtaṃ kshatrakulavatraṃ 132
dyotaccûḍâmaṇînâm 137
droṇâd upârjitadhanus 142
draupadîṃ pariṇayantam 42
dhatse jarjaratâm 77
dhanurvidyârahasyeshu 61
dharme cârthe ca 18
dhâritaṃ drupadajâsvayaṃ° 45
dhiñ mantraṃ çakuneh 71
dhṛshṭadyumno vishaṇṇo 73
dhruvam idam upadishṭaṃ 80
nakulasyâpi te bhrâtur 121
nakhakrakacapâṭana° 141
namah çivâya saṃsâra° 1
namitamuralamaulih 7
nâle sauryamahotpalasya 100
nirargalavinirgalad° 108
niryadvâsarajîva° 22
niryânti yasya vadanâd 114
nirviçantu nijabâhu° 51
nivartayâkshâñ chakune 101
nîlâṃçukaṃ nalinadâma 53
nyâyavâdî vikarṇo 'tra 133
pañcâṇâṃ yà kalatraṃ 126
padbhyâṃ muktâs 28
pâṇiprasthair bakula° 65
pâdo vâsasi sândra° 50




Digitized by Google

prathayati pâtraviçeshân 14
prasarpatu raṇâṅgaṇe 89
babhûva valmîkabhavaḥ 12
brahmabhyaḥ çivam astu 5
madbâhuyantrayuga° 76
mahîdharadarîshu ye 110
mâyâmaye 'samasabhâ° 98
yaduktimudrâ 17
yady aham hâritapûrvâ 131
yan muktaḥ sphâratâra° 127
yasmin madasya madanasya 57
yaḥ satyasya nidhiḥ 62
yâgakuṇḍaçikhigarbha° 63
yâtrâvato 'sya caturaṅga° 44
yâm me valaḥ subalavân 134
yâvan naikam drupada° 129
yudhishṭhiro dharmamayo 94
yeneyam yâjñasenî 140
ye pîyûshabhujâm 55
ye vidyâparameçvara° 16
ye sîmantitabhasmagâtra° 2
yogîndraç chandasâm 15
yo bhârgavâd bhagavato 119
yo manthânakaraḥ kratau 116
yauvarâjyâbhishekârho 40
raṇantamaṇiṇeurâ 92
râjan yudhishṭhira narâdhipa 113
râjaçekharakaver mahâtmano 8
râjasûyakrator yajvâ 96 102
râjâvalîkramâyâto 105
re re brâhmaṇa muñça 82
revatîm tribhuvanaika° 54
lakshmîsamvaraṇair 26
varshâṇi dvâdaçâraṇye 125
valgaccâṇûracûrṇîkaraṇa° 58
vâcyam yatra duruktayaḥ 91
vinâyako yaḥ 20
vîryam vacasi viprâṇâm 88
vṛshaturagakarîndra° 56
vaikuṇṭhakârmuka° 72
vyâso vaikhânasavṛshâ 4
vriḍânateshu vadaneshu 74
çambhor mûrdhni gatâgatâni 35
çârîdyûtakalâkutûhali 29
çiçupâlamahîpâlo 64
çishyo 'smi bhârgavamuneḥ 37
çriyaḥ prasûte vipado 9
çrînirvâsanadiṇḍimo 93
sakalabhuvanarakshâ 32
samkarshaṇân nijatanû° 117
samghaṭṭotpishṭa 84
satyasamdho jarâsamdhaḥ 67
sadâ çivapraçishyo 'yam 36
sambhûtâ drupadâdhvare 123
sarve kârmukakarmaṭhâḥ 34
sâyakaç ca tvayâ mukto 81
sâ sûktir nidhinâtha° 6
sindhuyantritayâtro yam 46
sudhâvîcimucâm vâgbhir 107
sauhârdât praṇayâd 120
smitaparicitâ vṛttir 30
svasty âpastamba tubhyam 25
hambo hasta kṛtâstra 103
haracûḍâmaṇir indus 13
hâro 'yam keralastrî° 104
he draupadi tvam asi 130
helânamannṛpakirîṭa 115
helâlolitapâṇḍyakerala° 122

Digitized by Google